

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1965 विषय कर्मकाण्ड
नाव. श्रौतकातीयसूत्र (कर्कभाष्यसहितम्) अध्याय ३.
लेखक/लिपीकार ?
पृष्ठ २८ काल ? पूर्ण/~~अपूर्ण~~

M-1965

Checked 2012

M-1965

M-1965

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

॥श्रीगणेशायनमः॥ ॥होत्रासंमिश्रंकर्मद्वितीयेतुविधायेदानींतत्संमिश्रमनुविधातुं
तृतीयमारभतेसूत्रकारः॥हो०ह०।ननुहोतृषदनशब्दोनगवादिवत्तत्कचिद्रूढइत्य
तआहहोतेति।तथाचावयवार्थप्रतीतेर्होतृषदनशब्दोयौगिकइत्यर्थः।ननुहोतृ
षदनस्यकरोतिक्रियाकर्मत्वेनयूपादिवदुत्पाद्यकर्मत्वात्कर्मण्युत्पादनानेनवि
धीयते।नचकरोतेःप्रोक्षणादिवदुत्पाद्यकर्मत्वंप्रसिद्धमित्याशंक्यकरोतेरुत्पा
द्यकर्मत्वनियममाह॥करोतिरिति।ननुकर्ममध्येहोतृषदनादीनामुत्पादनेक्रमका
लादीनांलोपःस्यादित्यतआह।दृश्यतइति।तथाचतेषामपिपदार्थत्वेनप्रयोगवि
धिपरिगृहीतत्वान्नक्रमादीनांबाधइतिभावः।एवंपूर्वपक्षेप्राप्तेसिद्धांतमाह॥
स्थापनेति।प्रदेशेति।देशविशेषोपदेशान्यथानुपपत्त्याकरोतेःस्थापनार्थत्वमित्य

राम०
१

य
ल

र्थः।ननुदेशविशेषोद्देशेपिमहावीरादिवत्करोतेरवंभूतप्रादुर्भावार्थत्वमेवभवि
ष्यतीत्यस्वरसादाहकिंचेति।ननुहोतुरुपवेशनादिविधयएवैतेषामुत्पत्तिंप्रयोज
यिष्यंतीत्यतआह।प्रकृत्येति।लोकसिद्धेरेवहोतृषदनादिभिर्विधीनांनैराकांक्ष्या
न्नोत्पत्तिंप्रयोजयंतीतिभावः।यदिलोकसिद्धेर्नैराकांक्ष्येपिविधेःप्रयोजकत्वंकल्पना
तदादोषमाह।क्रियासान्तरेति।नन्वेवंयूपादीनामपिकर्मण्युत्पत्तिर्नस्यादित्यतआह
॥यूपादीनामिति।पूर्वपक्षोक्तंकरोतेरुत्पाद्यकर्मत्वंरूपहेतुमनूद्यतद्धात्वनामने
कार्थत्वाद्व्यभिचारेणहेतुंदूषयति।यत्त्विति।व्याख्यातुंसूत्रावयवमादत्ते।अपरेणवे
दिमितीति।नन्वयंपक्षोनिःप्रमाणकइत्यतआह।लिंगादितिसप्रमाणकंपक्षांतरमा
ह।वाश्रोणिमिति।नन्वेवमनयोःपक्षयोर्विकल्पःस्यादित्याशंक्यश्रोण्यंतरदेशवि

लकु४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

धायकस्य शास्त्रस्य बलवत्वेन लैंगिकेन दुर्बलेन समं विकल्पस्यान्याय्यत्वादुत्तरपक्ष
एव युक्त इत्याह यद्येवमिति। ननु न्यार्थदर्शनलक्षणमार्थवादिकं लिंगमप्यपठि
तां श्रुतिं प्रापयिष्यति अतोनेन समं विकल्प एव युक्तो नावधारणेत्याशंकेतनान्विति
श्रोण्युत्तरतो विधायकस्य शाखांतरीयवाक्यस्यानन्य परत्वेन बलीयस्त्वात्तेनान्यपर
मन्यार्थादर्शनं बाध्यत इत्याशयेन समाधत्ते नेति। नन्व न्यपरे पि वाक्यांतरीयपदश्रु
त्याहवनीयमपरेति प्रत्यया कथं तत्यज्यत इत्यत आह सचेति। तथाच बलवत्प्रमाण
विरोधेनांतराशब्दस्य गौणत्वमित्यर्थः। नैन्वग्न इति चतुर्थ्येकवचनोपात्तमेकत्वं
व्यक्त्यपेक्षमेव युक्तमग्निपदस्य व्यक्तिवाचकसमभिव्याह्रियमाणपदसमानाधिकर
ण्येन व्यक्तिवाचकत्वावधारणात्तस्या एव प्रकृत्यर्थत्वेन प्रत्ययार्थसंख्यान्वययो

राम०
२

ग्यत्वमित्याशंक्य सामानाधिकरण्यस्य लक्षणयाप्युपपत्तेर्न तदनुरोधेनात्यंतम
प्रामाणिकं व्यक्तेः पदार्थत्वाश्रयणमित्याशयेनाह। सोयमिति। नन्वग्निपदश्रवणा
दुभयोर्जातिव्यक्त्योर्व्यतीतौ समानायां कथं जात्यपेक्ष्यतावधारणमित्याशंक्या
ग्निपदस्य गवादिशब्दवद्रूढत्वेनाकृतिवाचित्वावधारणमित्याशयेनाह। कृतेरि
ति। तथा चैकत्वस्याकृत्यैवान्वयो युक्त इति भावः। नन्वाकृतेरनुष्ठानाविषयत्वेन संख्यान्व
यासंभवात्तदुपलक्षितायाः व्यक्तेरेव तदन्वय इति चेत्सत्यं स्यादेवं यदि व्यक्ति वदग्न्यादि
व्यक्तेरेकत्वान्वययोग्यता स्यान्न चैवमस्ति तस्याविषक्तावयवत्वादिति संक्षेपः॥ ए
तद्विचारप्रयोजनमाह। ततश्चेति। अस्य प्रैषस्य चोदकपरंपरया वरुणप्रघासेषु प्रा
प्तौ त्वत्राग्निद्वयविधानाद्द्वयोरप्याकृतेरेकत्वादेकवचनेन यथाश्रुतेन प्रकाशयितुं श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्यत्वादनूहइत्यर्थः।अतएवतत्र।तत्रतत्राऽन्यविधिपरेवाक्यएकवचनांतमग्निपदंदृश्यतइत्याह
।दृश्यतेचेति।नचैवमग्निर्हाहानुप्रहरेत्यत्राप्यन्यविधिपरेवाक्यएकवचनांतदर्शनाद्दनुप्र
हरत्वमित्यूहोनस्यादितिचेन्नतस्यानुवादत्वेनयथाप्रकृतिप्राप्त्याभिधायकत्वात्।नचैवं
भाष्योदाहृतेष्वपिदर्शनेषुसमानमितिवाच्यं।तत्रन्यायत्वाभिहितत्वादितिदिक्।उक्तन्या
यमन्यत्राप्यतिदिशति।एवंचेति।नन्वेकवचनांताग्निशब्ददर्शनेनाकृतेःपदार्थत्वावधा
रणंनयुक्तंकिंतुद्विवचनांताग्निशब्ददर्शनाद्व्यक्तेरेवतथात्वमित्याशंकते।ननुचेतिवच
नोपात्तसंख्यायाःप्रकृत्यर्थान्वयव्युत्पत्तेर्जातेःप्रकृत्यर्थत्वेविभक्त्युपात्तसंख्यान्वयोपपत्ते
र्नतेनतद्वाच्यत्वकल्पनमित्याशयेनसमाधत्तेनैषदोषइति।वचनंहीति।द्विवचनमित्य
र्थः।ननुव्यक्तेःपदार्थत्वाभावेतत्प्रत्यायकप्रमाणाभावेनोपस्थितेरसंभवान्नतयाप्रत्यया

स्या ३

र्थसंख्यान्वयोयुक्तइत्यतआह।व्यक्तेरिति।तथाचभेदपक्षेलक्षणयाभेदाभेदपक्षेतादात्म्येन
जातिवाचकशब्दएवव्यक्तेःप्रत्यायकइत्याशयः।यद्वाननुद्विवचनस्यव्यक्तिपरत्वेव्यक्तेरपिवा
चकत्वप्रसंगइत्यतआह।व्यक्तेरिति।जातिवाचकपदेनैवलक्षणयातादात्म्येनवाप्रत्ययोपपत्ते
र्नव्यक्तेर्वाच्यत्वकल्पनंगौरवादित्याशयः।हो·के·अ·त·।मन्द्रा।पांशुना।ननुयजुषामुपांशुप्रयोग
विधानादुपांशुप्रयोगेतुविशेषाभावात्तत्परमिदंस्वरविशेषविधानमित्यतआह।सत्वायमि
ति।सं·न·।नन्वस्यप्रैषस्ययाजमानत्वाक्रत्वर्थत्वेप्रमाणाभावाद्धर्ममात्रार्थत्वात्प्रोषितेनाप्य
यंप्रयोक्तव्यइत्यतआह।सत्वायमिति।सामर्थ्याद्धोतृसंबोधनार्थइत्यर्थः।ननुवचनेनास्या
ध्वर्यवसमाख्याबाधेनयजमानकर्तृकविधानात्प्रोषितेनापियजमानेनायंप्रयोक्तव्यइत्य
तआह।इहेवेति।प्रतिनिधिनाध्वर्युणाप्रयोक्तव्यइत्यर्थः।अं·ध्या।सूत्रंव्याकरोति।अंगुष्ठा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यामित्यादि। नन्वत्र यजमानपराभावात्समाख्ययाध्वर्युकर्तृकत्वमेवस्यादित्यत आह। वश
त्वादिति। ननु लोके हस्तयोरेव कर्मसाधनत्वप्रसिद्धेरंगुष्ठाभ्यामित्यनेन हस्तांगुष्ठयोरेवला
भात्पाद्याभ्यां वेत्यनेन विकल्पः समुच्चयो वा विधीयत इत्याशंक्या विशेषशब्दस्य विशेषेलो
कप्रसिद्धिरनेकांतत्वेन तयांगुष्ठशब्दो हस्तांगुष्ठे व्यवस्थापयितुमशक्यत्वेन तुल्यार्थत्वाभावा
न्न विकल्पसमुच्चयो। किंतु सामान्यविशेषयोः परस्परोपसंहार एव युक्त इत्याह। पादाभ्यामि
ति। कर्थयंमियमेवावधारणेत्यत आह। माध्यंदिनीयेति। तथा च सामान्यविधिरस्फुटो विशे
षेणोपहीयत इति न्यायेनोपसंहार एव युक्त इत्याह। दृष्ट इति। अ॰ श्रा॰। नन्वेवबाधनस्यकृत्व
र्थत्वेनाभिचारणिकत्वाभावान्नोदकोपस्पर्शनमित्यत आह। अत्र चेति। नन्वभिचाराभा
वेपिकृत्वर्थत्वेन द्वेष्यद्विषतोर्नामादेशस्यावश्यकत्वेनोदकोपस्पर्शनविषयस्य निर्णेतु

ष्य

४

मशक्यत्वात्कथमुच्यत उदकोपस्पर्शनमित्याशंकते नन्विति। नामादेशकृतविशेषा
भावेपि वैज्ञानिकविशेषमादायोदकोपस्पर्शनमुपपद्यत इति समाधत्ते उच्यत
इति अत्र ब्राह्मणे अभिचारविधायकवचनाभावे भिचरन्नन्यत्रापीत्यस्य सूत्रस्य वि
षयत्वाभावान्नोदकोपस्पर्शनं युक्तिमदिति पूर्वस्वरसेन मतांतरमाह। केचित्विति
॥ यान्येति। ननु प्रकृते नियमसामिधेनिकत्वात्सूत्रावयवोनर्थक इत्याशंकते। ननु चे
ति। यावत्तावच्छब्देन पंचदशै वोच्यंत इति समाधत्ते सत्यमिति। ननु नैतावतानर्थक्य
परिहारो वृत्त इत्यस्वरसेनानर्थक्यपरिहारांतरमाह अथ चेति। ननु तथापि वैकल्पि
कपदार्थावधारणस्य पूर्वमेव कृतत्वान्नानियतसंख्याकत्वं सामिधेनीनामिति चेत्स
त्यं तदपेक्षयैवोक्तं यावदिति॥ नन्विदमहमवबाध इति पूर्वसूत्र एवाभिहितत्वादत्रत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आह
५
सामि

दभिधानमनर्थकमित्यतैइदमहमितिँतथाचोच्चारणक्रमविधानार्थमिदमह
मितिशब्दयोरुच्चारणमित्यर्थः। सूत्रावयवंव्याख्यातुमादत्तेनावर्तिष्यइतीति। त
थाचप्रकरणापूर्वसाधनैर्धेनी संख्यावाचकपूरणप्रत्ययांतत्वेनप्रयोगःकर्त
व्यइत्यर्थः। एवंचविकृतौचोदकसामिधेनीनांप्राप्तेस्तत्रसंख्यांतरविधानात्प्राकृ
तसंख्यावाचकशब्देनप्रकाशयितुमशक्यत्वात्पूरणप्रत्ययांतत्वैर्विपरिणमतइ
त्याह। यद्येवमिति। प्रथमंसामिधेन्यः सप्रणवाः अनूच्यंतइतिसूत्रेप्रतिप्रणवइत्यु
क्तं। यद्यपिसूत्र आधानमात्रंश्रुतंतथापिसर्वमिध्मामित्येतत्सूत्रादिध्मानांबोध्यं। अत
एवप्रणवंप्रणवंप्रतीतिप्रतिप्रणवमितिवीप्सासमासमादायव्याकरोति। सामिधेनी
ति। नन्वेवमनयोर्यथासंख्यलक्षणात्स्थानादंगांगिभावैस्यादिति। चेन्नेत्याह। सोयमि

१एव

न

राम
५

ति। ~~[illegible]~~। इध्मस्यसामर्थ्येनाग्न्यर्थत्वात्सामिधेनीनामपिलिंगेनस्थानंबा
धित्वाग्न्यर्थत्वेनविनियोगान्नानयोरंगांगीभावेप्रमाणमित्याह उभयोरिति। वचन
मंतरेणेति लिंगापेक्षयाबलवत्प्रमाणश्रुतिमंतरेणेत्यर्थः ननुसामिधेनीनांयाज्यात्वे
नसंस्तवादिध्माधानस्याकृतित्वेनसंस्तवादनयोरंगांगिभावसंबंधएवयुक्तइत्येक
देशीमतंदूषयितुमनुवदति यत्विति। तन्नुमंत्रलिंगविरोधेन गुणवादैत्का लार्थसं
योगपक्षेप्युपैद्यतइति दूषयति। तदिति। उभयंचैतदिति अवभृथेचोदनालिंगेनप्रा
प्तयोरिध्माधानसामिधेन्योस्तत्रत्याम्नानेनाग्निबाधात्तत्समिंधनार्थत्वेनेध्माधा
नस्यसमिध्यमानसंस्कारकसामिधेन्यनुवचनस्यचबाधइत्यर्थः। सङ्श्रेतः। अत्रस
मिद्धोअग्नआहुतइत्येतस्याद्यः प्रणवस्तस्यास्तिरूपद्वयमेकंशोचिष्केशस्तमिमहो

प

त्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

नरत्वमपरं समिद्ध इति ऋचः प्राप्तं। तत्राद्यं रूपं विवदित्वा सूत्रं व्याकरोति समिद्ध इतीति। यः प्रण
वः शौचिष्केशस्तमिमहोतर प्रणव इत्यर्थः। नन्वनुयाजाश्चेदिति सूत्रावयवो नोपपन्नः प्रकृता
वनुयाजानां निसत्वादित्यत आह। तच्चेतदिति। तथा चैकस्य काण्डस्य वाक्येनानुयाजार्थत्वा
दातिथ्यादौ प्रतिषेधेनानुयाजानां बाधे तदर्थस्येध्मकाण्डस्यापि बाध इत्यर्थः। अत्रैकदेशिभिः
समिद्ध इत्यस्या ऋचः प्राक् प्रणवत्वं यथाश्रुतं विवक्षितं। तथा च चोदकात्सामिधेनीनां विकृतौ
प्राप्तौ तत्राधिकानां ऋचां विधानात्तासां च समिध्यमानसमिध्यवत्योरंतरावापस्यन्यायसि
द्धत्वादागंतूनामंत्यप्रणवस्यैव प्राक्प्रणवत्वात्तत्रैव सर्वप्रक्षेप इति व्याख्यातं तद्दूषयितुमनुव
दति। समिद्ध इतीति। प्रकृतौ शौचिष्केशस्तमिमहोतर प्रणवत्वं विवक्षितत्वाद्दूषयति। ननु
नरिति। नन्वेवं सूत्रे लक्षणाप्रसंगः इत्यस्वरसेनाह। किं चेति। नन्वस्य पारिभा षिकस्य प्रकृ

६

श

तिगामित्वाद्विकृतौ चोदकेनैव प्राप्तेर्न चास्तु विकृतौ चोदकप्राप्तिस्तथापि कथं काष्ठानां
वृद्धिरिति चेन्न प्रणवोद्देशेनाधानस्य विधानात्तद्विवृद्धौ काष्ठानामपि वृद्धिरित्याशंक
ते। अथेति। अंगिवृद्धावंगवृद्धेः प्रमाणसिद्धत्वात्तदभावे वृद्धेरप्रामाणिकत्वमित्याशये
न समाधत्ते साहीति प्रकृतौ प्रतिप्रणवमाधा नमिति सूत्रेण प्रतिप्रणवमाधानविधा
नात्प्रणवानां पंचदशत्वात्पंचदशप्राप्तेः स्पर्शास्यर्शानुयाजार्थेध्मत्रयांतर्भावेनाष्टाद
शसंख्यायाः प्राप्तत्वात्तत्परत्वेष्टादशेध्ममिति सूत्रं व्यर्थं स्यात्तस्माद्विकृतौ वृद्धिर्मा
भूदित्यष्टादशेध्ममिति सूत्रं परमार्थः। न न्वेवं समिध्यमानोध्वर इत्यस्याः प्रणव इति सू
त्रणीयं स्यादित्यत आह तस्मादिति। श्रुतिमेवोदाहरति। एवं हीति। अंद्रीति। नन्वनुवच
नशब्देन तिष्ठन्नन्वाहासीनो यजतीत्यादावनुवाक्यार्थमनुवचनशब्दस्य प्रयोगात्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

दंतस्य प्राप्तिः स्यादित्यत आहानुवचनेति। अत्र प्रमाणकमाह निविदेति। तथाचाग्रेम
हां असि ब्राह्मण भारतेत्यस्मान्निविदः प्रागित्यर्थः। एवं स्वमतं अनुवचनपदार्थं निर्णी
यैकदेशिमतमाहापरे त्विति। नन्वेतत्तदनुवचनमिति वाक्यशेषानुपपन्न इत्यत आ
ह। एतदभिप्राय इति तथाचाग्रेमहांऽ इत्यादीनां निविदां सामिधेन्यैकवाक्यतापन्नत
यानुवचनांतर्गतत्वमिति भावः। अत्रायमस्वरसः। निविदां सामिधेन्येकवाक्यत्वे किं
प्रमाणं संनिधिपठितत्वमिति चेन्न। नहि संनिधानमात्रमन्वये कारणं किं त्वाकां
क्षापि न च सा विद्यते नुभयोः समिध्यमानाग्निप्रकाशकत्वेन नैराकांक्ष्यात्। एतेना
वां ... तरप्रकरणात्सामिधेन्यंगत्वमिति निरस्तं। अत एव गुणानां च परार्थत्वा
दसंबंधस्तयोरित्यभियुक्तैरुक्तं। तस्मात्सामिधेन्यंत एवानुवचनांत इति तत्वं। अनु

सम.
७

वचनांत इति पदं व्याख्याय वेदेनेत्यादि व्याकरोति। तदंतेइति। एतदुपवाजनं दृष्टार्थमुतादृष्टार्थ
मिति संदेहे पूर्वपक्षमाह। तदेतदिति। उपवाजनं धूमनमित्यर्थः। सिद्धांतमाह। धर्ममात्रेति। ननु
द्रव्यनियमो दृष्टार्थत्वेप्युपपद्यत इत्यत आह। संख्येति। एतदेव व्यतिरेकमुखेन दर्शयति। नहि
ति। अवादावित्युपलक्षणं परिश्रुत्स्वपि दृष्टत्वं प्रकृतावुपवाजनस्यादृष्टरूपाग्निसंस्कारकत्वेन
विकृतौ चोदके ... न दृष्टादृष्टार्थसर्वाग्निसंस्काराणां स्थानापत्त्या प्राप्तावुपवाजनस्यापि प्राप्तेर
वभृथादौ प्रत्याम्नानेनाग्निबाधे थेलोपाद् दृष्टार्थानां सर्वेषां संस्काराणां बाधे प्यर्थलोपाभावाद
दृष्टार्थानां न बाध इत्यर्थः। ननु होमत्वेन शक्त्या स्रुवस्यैव संप्राप्तेस्तद्ग्रहणमनर्थकमित्यत आ
ह। स्रुवग्रहणमिति। नन्वाघारमित्यनर्थकं द्रव्यगुणादावप्रसिद्धेर्भावार्थपरत्वाच्च तस्य चाघार्य
शब्देनैवोक्तत्वात्। न चाघार्येत्येतस्येदं कर्म तद्भिन्नत्वात्। नहि तदेवाघारणं क्रिया कर्म च सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

भवति तस्मादनर्थकमित्यत आह। आघारमितीति। संज्ञाप्रयोजनं मन्तु स्रुवाद्याघारमाघार्ये
त्यादौ व्यवहारः। नन्वेवमाघारं हुत्वेति सूत्रणीयं न त्वाघार्येत्यत आह। आघार्येतीति। आघारय
तिधातूद्देशेन विहितानामृजुमाघारयति ऊर्ध्वं संततमाघारयतीत्यादीनां परिग्रहार्थमित्यर्थः।
नन्वत्र तद्धितचतुर्थीमंत्रवर्णानां देवताविनियोजकानां प्रमाणानामभावेन देवतासंबंधाभावा
न्नास्य यागत्वमित्यत आहात्र चेति। अव्यक्तचोदनासु जुहोतित्वसामान्यात्प्रजापतेर्देवतात्वमि
त्यर्थः। स्वाहाकारेण वषट्कारेण वा देवेभ्यो हव्यं प्रदीयत इत्यनेनारभ्याधीतवाक्येन होमे स
र्वत्र स्वाहाकारविधानादत्रापि स स्यादित्याह। स्वाहाकार इति। अत्र प्राप्तोपि स्वाहाकारः प्रति
षेधाद्बाध्यत इति सिद्धांतमाह। नं वेति। नन्वेवं विकल्पः स्यात् न विधेः सामान्यत्वेन दुर्बलत्वा
न्न विकल्प इति वाच्यं। दुर्बलस्यापि विधेर्निषेधापेक्षत्वेन बलीयस्त्वादिति चेन्न स्यादेवं॥

८

यद्ययं प्रतिषेधः स्यात् किंतु पर्युदास एवाश्रित इत्यनवद्यं। नन्वयं विचारोनुपपन्नः परि
भाषायाः मंत्रवद्धोमविषयत्वेनात्र स्वाहाकारप्रापकत्वाभावात्। न चात्र देवतानामधे
यमेव मंत्रस्तस्योपांशुत्वविधानादिति वाच्यं। तूष्णीतमाघारयतीत्यनेन देवतानामो
च्चारणप्रतिषेधात्। यत्तु तस्माद्यत्किंचिद्यज्ञे क्रियत इत्युपांशुत्वविधायकं तत्तु
पूषाप्रविष्टवत्प्रकरणे समावेशाभावादन्यत्रोत्कृष्यते न चात्र स्वाहाकारप्रतिषेधान्य
थानुपपत्त्या प्राप्तिरनुमीयत इति वाच्यं परिभाषासूत्रे मंत्रवद्ग्रहणवैयर्थ्यापत्तेः स्वा
हाकारप्रतिषेधस्य तु नानुयाजान्यजतीतिवन्नित्यानुवादत्वेनाप्युपपत्तेः तस्माद्यु
क्तोयं विचार इति चेन्न त्वयं विचारस्य कृत्वाचिंतार्थत्वात्। यद्यपि परिभाषासूत्रे मंत्रव
त्त्विति पदं न स्यात्तदाप्यत्र प्रतिषेधात्स्वाहाकारो न स्यादिति कृत्वाचिंतितं। वस्तुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नु मंत्राभावेपिपूर्णाहुतिकविध्यं तद्ग्राहित्वेनाघारादीनां यूपावटहोमवत्स्वाहाका
रप्राप्तिरस्ति तस्यायं प्रतिषेध इति संतोष्टव्यं। चोदनालिंगातिदेशेनावभृथेष्टेपौर्ण
मासिकसर्वधर्मप्राप्तावग्निसंमार्गस्य प्रकृतौ द्वितीयया ग्न्यर्थत्वेन विनियोगात्प्रकृ
तौ प्रत्याम्नायेनाग्निकार्येपां विधानात्कार्यापत्ता संमार्गस्यापि तत्र प्राप्तेः प्रैषस्या
पि तादर्थ्येन तत्र प्रवृत्तौ तत्र प्रकृतिलिंगवचनानां यथाश्रुतौ विकारार्थप्रकाश नां
कत्वाभावात्प्रकृतिलिंगवचनानां त्रयाणामविपरिणामेण प्रवृत्तिरित्याहाग्निम
ग्नीदिति। आघारस्य दृष्टप्रयोजनादृष्टार्थत्वमतो यावदुक्तेष्व हमेधीयादि
षु निवृत्तिरित्याह पदार्थत्वाच्चेदिति। नन्वेवमुपवाजनस्यापि तत्र बाधः स्यादि राम·
त्यत आह उपवाजनमिति। अदृष्टरूपाग्निसंस्कारत्वादुपवाजनं यावदुक्तेप्र ९

वर्त्तत इत्यर्थः। इ॰ क्रा। मं। सूत्रं सूत्रे सन्नह्नेरिति बहुत्वं धात्वपेक्षं अनुपरिधिरितिदेशलक्षणार्थम
तो न कार्मयोगी परिक्रामंतीति णमुल्वीप्सार्थ इति एतत्सर्वमभिप्रेत्य सूत्रं व्याकरोति इध्मसन्नह
नैरिति। एकद्रव्ये कर्मावृत्तौ सकृन्मंत्रवचनमिति न्यायेनात्र सकृदेव मंत्रप्रयोग इत्येकदेशीमतमुप
स्थापयति। अत्र केचिदितिपरिभाषायां द्रव्यपदस्याप्युपलक्षणत्वमभिप्रेत्य देशभेदेपि मंत्रप्रवृत्तिरि
ति स्वाभिमतसिद्धांतमुतमाहादेशभेदादिति। ननु नदेशभेदे क्वचिन्मंत्रावृत्तिप्रमाणाभावादित्यत
आह। तथा चेति। सूत्रं तूर्णरि। नन्वत्र पूर्ववण्णमुल्लोपादानाभावान्न परिक्रमणमित्यत आह। णमुलिति।
नन्वनुपरिधिशब्दस्य देशोपलक्षणत्वे क्रमनियामकत्वमपि भविष्यतीत्येकदेशिमतमाशंकते नु
परि धी ति। परिधिसंस्कारभावेन प्रवृत्तिक्रमस्याविषयत्वान्न क्रमनियामकत्वमिति दूषयति।
नेतीति। अ॰ सूत्रं त्रीनं। सूत्रं व्याकरोति। आहवनीयेति। स्वधापितृभ्य इतीति। पूर्वस्मादंजले र्दक्षिण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

तइत्यर्थः। नन्वाहवनीयस्य दक्षिणतः किन्न स्यादिति चेन्न। पंचम्यंतत्वेनासमर्थत्वात्। नहि द्वि
तीयांतमाहवनीयपदं पंचम्यंतेन दक्षिणतइतिपदेनान्वयसमर्थं। येन तथान्वयः स्यादिति भावः
। ननु देवेभ्यश्चैनासितभ्यश्चार्त्विज्यं करिष्यन्निहुतइत्यनेनार्त्विज्यांगत्वावगमात्तद्दूरोत्तरसर्वप
दार्थांगत्वमंजलिकरणस्येत्यत आह। तदेतदिति। यद्यंजलिकरणस्यापि बाधइत्यर्थः। अं॰ विति
दृष्टार्थत्वात्प्रयाजादिवत्प्रकरणेन प्रधानभावनेतिकर्तव्यतार्थत्वेन विनियुज्यतइत्यत आह। तदेत
दिति। तथा च वाक्येन प्रकरणं बाधित्वोत्तराघारांगत्वेनांजलिकरणं विनियुज्यतइत्याशयः। तद
भावे गृहमेधीयादौ यावदुक्तेष्वुत्तराघाराभावेन तत्प्रयुक्तांजलिकरणस्यापि बाधइत्यर्थः। अं॰ वि
ति। सूत्रावयवमाक्षिपति। पित्र्यमिति। तस्याप्यन्यस्यापि प्राचीनावीत्यादीनां प्राप्तिस्तत्परिसं
ख्यार्थं पुनरिदं सूत्रमिति समाधत्ते। अतइति। ननूत्तरांगुहूकृत्वे त्येतदपि अनर्थकमित्याशंक

१०

ते। नन्वेतदिति। विषयभेदमादाय समाधत्ते। उच्यतइति। ननु सर्वविषयविधानेनैवोत्तराघारवि
षयत्वस्यापि प्राप्तेः पुनर्विधानमनर्थकमित्याशंकते। सर्वार्थतयेति। उत्तराघारांगत्वेनेदमपूर्वं मं
त्रवदादानं विधीयतइति समाधत्ते। एवं चेदिति। लाघवादनारभ्याधीतवाक्यप्राप्तक्रमादापनोद्दे
शेन मंत्ररूपगुणमात्रविधानं किं न स्यादित्यत आह। अथ पुनरिति। पारिभाषिक एवोपादाने मं
त्ररूपगुणविधानं किं न स्यात्। न च तस्य सर्वार्थत्वान्न तत्र मंत्रविधानमिति वाच्यं तस्य सर्वार्थत्वे
प्रमाणस्य वाच्यत्वादित्याशंकते। ननु चेति। परिभाषामूलभूतस्य वाक्यस्यानारभ्याधीतत्वेन प्रा
कृतसर्वस्रुगादानविषयत्वमिति समाधत्ते। उच्यतइति। नन्वेतस्यापि महाप्रकरणपरिगृहीत
त्वात्प्राकरणिकसर्वादानांगत्वं स्यादित्यत आह। इदं त्विति। इदमप्यपूर्वं मंत्रवद्ग्रहणमादानवद
वांतरप्रकरणेनोत्तराघारांगत्वेन विधीयतइत्याह। अयमपीति। परिधीमिति। नन्वपरेणेतित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीयानुपपन्ना। नहि होमेपरदेशस्यकरणत्वं कर्तृत्वं वा संभवतीत्यत आह। अपरणेति। नत्विदं सं
चरविधानं मंत्रवद्दक्षिणातिक्रमणविधानवद्वांतरप्रकरणेनोत्तराघारार्थत्वेन विधीयत इत्य
११ त आह। सर्वार्थमिति। सू॰ तः। नन्वस्य संचरस्याप्युत्तराघारावांतरप्रकरणादुत्तराघारार्थत्वमि
नै त्यत आह। एतदपीति। नैवमाश्रावणयुक्तासु यजतिष्वेवार्थनियमः स्यान्नजुहोतावुत्तराघार
इत्याशंकते। ननु चेति प्राप्तातिक्रमणानुवादेन पादनियमविधानो दाश्रावणस्यानुवादवि
शेषणविशिष्टातिक्रमणविध्यनुवादाद्वात्युद्देश्यां वाक्यसमाप्तेर्वाक्यभेदप्रसंग इत्याशयेन
समाधत्ते। अत्रोच्यत इति। ननु श्रावणेसु यमेमेभूयास्तमिति मनुवादत्त इति प्रकृत्यां [illegible] ११
विष्णु इत्यादीनां सर्वेषां मंत्राणां व्याख्यानाद्दक्षिणातिक्रमणादिपदार्थविधानाभावात्तदनु
विधायकानि सूत्राण्यनुपपन्नानीति चेत्सत्यं। लक्षणावाक्यभेदः लिंगानुमितविनियोगश्च

त्वान्मंत्राणां दक्षिणातिक्रमणे विनियोगादिति भावः। वं॰ घारं॰ नन्वस्योत्पत्तिवाक्ये तद्धितचतुर्थी
भ्यां देवताश्रवणादस्य संस्कारमात्रत्वं स्यादित्यत आह। मंत्रवर्णाच्चेति। अस्यापि केवलमदृष्टा
र्थत्वात्प्रयाजादिवद्यावदुक्ते निवृत्तिरित्याह। स चायमिति। नन्वस्य द्रव्याविधानान्नयागत्वमि
त्यत आह। प्रयाजार्थेति। नन्वन्यार्थोत्पन्नस्य द्रव्यस्य कथमन्यत्र विनियोग इत्यत आह। वच
नेति। वचनमेवोदाहरति। चतुर्गृहीतमिति। नन्वस्य प्रयाजार्थतायां किं प्रमाणमित्याशंक्य पू
र्वोपन्यस्तं प्रमाणं स्मारयति। प्रयाजार्थनाचेति। नन्वस्यान्यार्थोत्पन्नद्रव्यसाध्यत्वादन्यस्य द
र्विहोमादेर्वचनेन बाधे तदर्थस्य द्रव्यस्यापि बाधादुत्तराघारस्यापि बाधप्रसंगः स्यादित्यत आ
ह। एवं चेति। अन्यार्थद्रव्योपजीविनोप्युत्तराघारस्य न तद्द्रव्यबाधेप्यदृष्टार्थत्वात् द्रव्यांतर
प्रयोजकत्वं तददृष्टस्यान्योन्योत्पाद [illegible] यितुमशक्यत्वात् भविष्यतीति भावः। आ[illegible]वेति। सू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२

त्रावयवमाक्षिपति। जुहोतीति समाधत्ते उच्यत इति। ऋज्वाद्यर्थ इति। नन्वाघारमिति नान्नैव धर्मसंबंधोपपत्तेराघार्येति निरर्थकमिति चेन्न। ऋज्वादिगुणविधीनां शास्त्रांतरीयत्वेनेह विशिष्य ज्ञापनस्यावश्यकत्वेनाघार्येतिपदस्यार्थत्वात्। अत एव धर्ममात्रेषु समुच्चय इत्यनेन न गतार्थं सूत्रे ध्रुवामितिदं ध्रौवाज्यपरं ज्योतिर्वा मितरस्यामाज्यं ज्योतिरितरस्यां ते ह्युभे ज्योतिषा संगच्छेते इत्याज्ययोः संगमनश्रवणात्। अत एव जुह्वा पदं लक्षणया जौहवपरमिति व्याकरोति। जौहवेनेति। मंत्रवाक्यस्य साकांक्षत्वेन न तदाकांक्षापूरणयोग्यं पदमध्याहरति। गच्छतामितीति। ननु जुहूपदस्याज्यपरत्वे लक्षणाप्रसंग इत्याशंकते। यद्यपीति। काष्ठस्य द्रवद्रव्यसाध्यसमंजनक्रियाकरणत्वान्वयानुपपत्तेर्लक्षणैव न्याय्येत्याशयेन समाधत्ते। तथापीति। सोत्र प्रयोगस्य पौरुषतंत्रत्वान्न तत्र लक्षणायुक्तेत्याशंकते। नन्विति। जौहवेनेति सूत्रे कर्तव्ये सामर्थ्यी

१२

स्रुवप्राप्तौ स्रुचः करणत्वं न स्यादिति समाधत्ते नेत्याहेति। न च जुह्वधिकरणतया तत्करणत्वप्राप्तिरिति वाच्यं। जुह्वावचन इत्यनेन होमे तत्प्राप्तावप्यंजने तदप्राप्तेः। तस्माद्युक्तं तादर्थ्ये न लक्षणाश्रयणमिति दिक्। नन्वाघार्येत्यनेन समंजनस्यैकवाक्यत्वाद्वाक्येनाघारार्थमेव समंजनं स्यादित्यत आह सच्चायमिति। ननु त्वालेणे ध्रुवयासमनक्तीति श्रवणान्न ध्रुवासंस्कारोयं। न च ध्रुवायाः प्रयोजनवत्त्वात्तृतीयार्थेति वाच्यं। जुह्वा अपि प्रयाजार्थत्वेन प्रयोजनवत्त्वादिति चेन्न शिरो वै यज्ञस्योत्तर आघार आत्मा ध्रुवा तदात्मन्येवैतच्छिरः प्रतिदधातीत्यनेन वाक्यशेषेण ध्रुवासंस्कारस्यैव प्रतीतेस्तृतीयाया द्वितीयार्थत्वैव युक्तेति भावः। नन्वस्य ध्रुवासंस्कारत्वे विकृतौ प्रत्याम्नादिभिरुत्तराघारबाधेपि ध्रुवास्वसंस्कारार्थं द्रव्यमाक्षेप्स्यतीत्यत आह। उत्तराघारे सतीति। सतीत्यनं

द्वितीया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरंवाक्यशेषादिति शेषः। तदेववाक्यशेषमुदाहरति। एवंहीति। नि॰ हार्न न्विदंस्रु
ग्निधानमार्थिकं स्रुक्सघस्तेन होत्रवरणस्य कर्तुमशक्यत्वात्ततोपग्रहांतरस्य
विधानादित्यत आह। स्रुग्निधानमिति। आर्थिकत्वेन्यस्मैदत्वाप्याश्रावणस्य
कर्तुंशक्यत्वान्नियमेन निधानंभवेदित्याह इतीयेति। अ॰ ग्नीत्। वैके। ननूभय
त्राविशेषेण स्रुत्रादपच्छेदः प्रतीयत इत्याशंक्यमूलश्रुतौविशेषोपपादनात्न
बर्हिषोपच्छेदं इत्याशयेन श्रुतिमुदाहरति। एवमिति। फलितमाह एवंचेति।
एवं॰ श्रु। नन्वेवंशब्देनकिम तिदिश्यते इत्याशंकायामेकदेशिमतमाह। उपग्र
हेति। नन्विदमयुक्तं यतो ब्राह्मणेस्वैप्रवरायाश्रावयतीत्यनेनाश्रावणानुवादे
नोपग्रहद्रव्यंविधीयते तथा चानुवादस्य सन्निहितगामित्वेनवरणांगाश्राव

र
राम॰
१३

णार्थत्वेनविनियोगात्नसर्वार्थत्वेनातिदेशोयुक्त इत्याशयेनदूषयति नैवयुक्तमिति। य
द्वास्वैप्रवरायेत्यनेनवरणांगविधानादुत्तरत्रापिवरणांग [illegible] स्यैवविधानात् ताभ्यां
संदष्टमिध्मसन्नहनादानमप्यवांतरप्रकरणात्तदर्थमेवयुक्तमित्याशयेनदूषय
ति। तदेतदिति। न च वाक्ये नावांतरप्रकरणबाधः तयोरत्रविरोधाभावात्। अन्यथा
भिक्रमणस्यापिवाक्येनप्रकरणबाधात्सर्वहोमार्थत्वंस्यादित्यास्तां। एतदेवव्यतिरे
कमुखेनाह। नहीति। एवंमा [illegible] ध्यंदिनीयशाखानुसारेणोपग्रहद्रव्याणांवरणांगत्वं
निर्णीतंसंप्रति शाखांतरीयंवाक्य [illegible] मेवोपग्रहद्रव्याणांवरणांगत्वेप्रमाणत्वेनोप
न्यस्यति। इदंवैकिंचिदिति। यत्वेकदेशिनोच्यते नैवंविधः शाखांतरेपाठोस्तीति त
त्तुसर्वशाखोपलब्धिमतातेनैवेदंवक्तुमशक्यमित्यौ। तस्मादतिदेश्याभावादिदंस्रु

स्तां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रमनर्थकमित्यत आह तस्मादिति। नन्विदमयुक्तं प्रत्याश्रावणस्यात्र श्रुतावविधानादि
त्याशंक्यास्मिन्नर्थेन्यार्थदर्शनं प्रमाणयति। तथा च लिंगमिति। अं व्य इति। ननु सूत्रे
थशब्दोनुपपन्नः तस्य क्रमार्थत्वात्क्रमस्य च पाठादेव सिद्धेरित्याशंकते। अथ तीति॥
अहोतावाएषपुराभवति यदेवेनं प्रवृणीत इत्यनेन होतृत्वं संपादयितुमानसर्थंकर
णं विधीयत इत्येकदेशिमते समाधानमाह। तेनेति। पूर्वं सामिधेनीपाठादादावेव त
स्यैव होतुः प्रवृत्तिदर्शनेनास्य वरणस्यानत्यर्थलाभावान्न यजमानकर्तृकत्वमित्ये
कदेशिमतं दूषयति। तदेतमिति। नन्वेवमथशब्दप्रयोगः सूत्रेनुपपन्न इत्याह। अथश
ब्देति। अवांतरप्रकरणलक्षणेन वान्यायेनेध्मसंनहनादानस्य वरणांगत्वं सूचयितु
मथशब्दप्रयोग इत्याशयेन स्वमते समाधानमाह। इध्मसन्नहनेत्यादिना॥

राम॰
१४

ननु स इध्मसन्नहनान्येवाभिपद्याश्रावयतीत्यनेन वाक्येनास्याश्रावणमात्रेंगत्वाव
गमात्कथं वरणे प्राप्तिरित्यत आह। तदर्थमेवेति। उत्करोत्यास्व शाखायां कल्पनयाता
दर्थ्यप्रतीतिरित्याशंक्य शाखांतरे स्पष्टमेव वाक्यं तदर्थबोधकमस्तीति किं तदित्याशं
क्य तदुदाहरति इदं वा इति नन्वाश्रावणस्य प्रकरणेन दर्शांगत्वमेव युक्तमित्याशंकाप
नोदायाथशब्दप्रयोग इति समाधानांतरमाह। अथवेति। यद्यप्यथशब्दश्रुत्यानाय
मर्थः प्रतीयते। तथापि। अनेकेष्वर्थेषु निपतंतीति तेनिपाता इति व्युत्पत्त्या निपातत्वाद

नुक

यमर्थोवसीयत इत्यवसेयं नैथमे तदर्थज्ञापकत्वमथशब्दस्येत्याशंक्य प्रमाणमाह। स
वैप्रवरायेति। अग्निर्देवो दैव्यो होतेत्यत्राग्निः संदिह्यते देवताग्निर्वा स्विष्टकृदग्निर्वा हो
तावेति एतेषु त्रितयेष्वप्यग्निशब्दप्रयोगदर्शनात्। तत्र पूर्वपक्षमाह देवताग्नेरिति। अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तु बाग्नेः स्वरूपेण देवत्वाद्देवइतिकथंचिद्विशेषणं दैव्योहोतेति तु कथमपि देवताग्नेर्नोप
पन्नइत्यभिप्रायेण दूषयति। नवेति। द्वितीयं पक्षमाह। तेनेति। ननु स्विष्टकृदग्नेरपि होतृ
विशिष्टत्वाभावात्तत्पदान्वयोनुपपन्नइत्यत आह। दृश्यतेहीति। दूषयति। तदेतदिति। नन्वप्र
कृतोपि स्विष्टकृदग्निर्मंत्रेणोपस्थाप्यतइत्यत आह। नहीति। ननु होतुरप्यप्रकृतत्वात्क
थं तद्विषयत्वमित्यत आह। किंचेति। ननु देवोदैव्योहोतेत्यादिपदार्थानां होतर्यप्यन्वयानु
पपत्तेर्नतद्ग्रहणमित्यत आह। तेनेति। ननु स्विष्टकृत्यपि तत्स्तुत्यर्थमिमानि विशेषणान्य
ध्यारोपेणोपपद्यंतइत्यत आह। इतरथेति। स्विष्टकृदभिधानपक्षइत्यर्थः। एकवाक्य
तेति। ननु नभरतवदित्यादिविशेषणान्वयानुपपत्त्यास्य होतृपरत्वं पूर्वकल्पसिद्धाग्नि
वदेतस्य देवताग्नेः स्विष्टकृदग्ने र्वीपष्टत्वादिति विशेषणान्युपपद्यंते। यथापूर्वक

पूर्व

राम.
१५

२स

क

ल्पसिद्ध[illegible] हिरण्यगर्भवदेतत्कल्पसिद्धस्यौऋषित्वं देवतात्वं चोपपद्यतइति चेन्न
पूर्वकल्पसिद्धस्यहिरण्यगर्भत्वाभावेन दृष्टांतासिद्धेः पूर्वकल्पसिद्धानामिदानीमुप
स्थापकत्वाभावेनोपस्थितेरभावाच्च हिरण्यगर्भादिशब्दानां स्थाननिमित्तत्वात्। अ
न्यथापूर्वकल्पीयऋषिवरणेनेदानींतनानां विश्वामित्रादीनामधिकारोदुर्निवा
रःस्यात्। तथाच मनुष्याणां वारंभसामर्थ्यादिसनुपपन्नं स्यादिति दिक्। अमु॰णि। न
नु मंत्रवाक्ये मुवदिति सर्वनामश्रवणात्तेनकस्यपरामर्श इत्याकांक्षायामाह सू॰। यज
मानेति नन्व थर्षिर्यं प्रवणीत इत्यारभ्यैकं वृणीते द्वौवृणीत इत्येक द्वयोरपि वरणश्रव
णात्कथं त्रीणीत्याशंकते त्रीणीतीति। असंख्यातवाक्ये विध्युपगमे प्रतिषेधद्वया
श्रयणेन वाक्यभेदप्रसंगादेकादिनासर्वेषां विधायकत्वेपि वाक्यपंचकप्रसंगादत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीन् वृणीतइत्येववविधिः विहिते च तस्मिन्नेकद्वयोरपि तत्रप्राप्तत्वादनुवादकत्वमित्या
शयेनसमाधत्ते। त्रीति। तथा चैकार्षेयद्व्यार्षेययोरनधिकार इति भावः। या॰ सू॰ तेः। ननू क्तं त्री
न्वृणीतइति विधिरिति कथं यावन्मंत्रं वरणमि त्याक्षिपति। तत्कथमिति। असंख्यायुक्त
वाक्ये विध्युपगमाद्यावन्तं वरणमिति समाधत्ते। आर्षेयं वृणीतइतीति। नन्वेवमपिप्रति
प्रतिषेधद्वयाश्रयणेन वाक्यभेदप्रसंग इत्यत आह। तथेति। तथा चैतावप्यनुवादाविति भा
वः। ननु सामान्यवाक्येन चतुःषष्ठादीनामपि वरणप्राप्तेस्तत्प्रातिषेधावेतौ नानुवादावित्य
त आह। आर्षेयानिहीनेति। तथा च प्राप्त्यभावेन प्रतिषेधाभावादनुवादावेताविंत्यर्थः। नन्वे
वं याज्ञिकानां त्रित्वविधानोद्घोषणमनुपपन्नं स्यादित्यत आह। त्रित्वविधानं त्विति। न
न्विदं सूत्रमनुपपन्नं वेदावयवानां मंत्राणां नित्यत्वेन कर्तृत्वासंभवादित्यत आह। मंत्र

कृतं

राम-
१६

कृतइति। ऋषिशब्दसमाख्यानादेव कृतत्वमित्यर्थः। ननु करोतेर्दर्शनार्थत्वमनुशास
न विरुद्धमित्यत आह दृश्यते चेति। पु॰ सू॰ वा॰ नन्विदं नवर्णत्रयविषयं ब्राह्मणस्य पुरोहिता
भावात्। न च स्फीतस्य ब्राह्मणस्य पुरोहितोऽस्तीति वाच्यं राजवत्तस्य वरणे विध्यभावा
दित्यत आह। तच्चैतदिति। एवं राज्ञः स्वार्षेयाभावाद्विकल्पानुपपत्तिर्न हि राज्ञः स्वत
आर्षेयमस्ति येन पुरोहितार्षेयवरणं विकल्पेतइति चेन्न। आचार्यार्षेयेण समं विक
ल्पसंभवात्। पक्षे मनु ऐलपुरूरवसामपि वरणविधानाच्च। सूत्रे क्ष॰ लं म॰ षां। अभ्यासका
रणाभावात्पुरुषभेदाभावादित्यर्थः। सूत्रे व्र॰ षः। सूत्रे उ॰ वा॰ होतृनामग्रहणे होतुर्दृष्टोपकाराभावा
ददृष्टार्थमेवेदं वरणमित्याह। तच्चैतदिति सूत्रे सं॰ तः। सूत्रे अ॰ ध्ये॰। अभिधानं समाख्यातत्सा
मर्थ्यादित्यर्थः। सन्निधानादिति तथा च सन्निधानेन समाख्या विशेषविषये व्यवस्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यतेइत्यर्थः। नन्वत्रसन्निधानापेक्षयाप्रकरणस्यबलीयस्त्वात्तेनसर्वार्थत्वेवमं
त्रोविनियुज्यतइतिचेत्सत्यंप्रकरणेनप्रकरणिनापरिगृहीतेमंत्रेद्वारापेक्षायांसंनि
धिस्तंसमर्पयतीतिसर्वंनिरवद्यं। प्रयाजांगतासाधनप्रयोजनमाह। एवंचेति॥
ननुस्रुगादापनमित्यस्यणिजंतः प्रैषः प्राप्यतेइतिचेन्न। स्रुचमास्यस्वेति। मंत्र
शेषेणाम्नानान्नस्यतंत्रः प्रैषः प्राप्यते। स्रुचमित्येकत्वंनाविवक्षितं। आस्याति
रत्रग्रहणार्थः। आत्मनेपदंछांदसं। छूतंमोपूर्वमंत्रस्यविलिंगत्वेनवचनेनविनि
योगाद्धोतारमद्धृथाइत्यत्रवाक्यसमाप्तिः स्यात्तन्माभूदितिसूत्रेघृतवतीतिद्विव
चनं। आश्रावणंप्रत्याश्रावणस्याप्युपलक्षणं। आश्राव्येतिणिजंतल्यबंतंका
रितद्वयंचात्रतुल्यं। तथाचाश्रावणंकारयित्वेत्यर्थः। तच्चाग्नीत्करोति। आ

कर्म
सूत्र
१०-मे॥

राम॰
१७

श्राव्याह समिधोयजेतेति। ल्यप्प्रयोगादेककर्तृताप्रतीयते। नन्वेवंमवधायकत्वा
न्मध्येश्रावणंनस्यादितिचेन्न। आश्रावणस्यप्रत्याश्रावणांतत्वेनमवधायकत्वाभावा
त्। एतत्सर्वमनसिकृत्वासूत्रंव्याकरोति। घृतवतीमित्यादिना। नन्वर्थाद्धविषामति
क्रमणंप्राप्तमितिनपुनर्विधेयमित्यतआहस्रुचौगृहीत्वेति। प्राप्तस्याप्यतिक्रमण
स्यपुरोनुवाक्यापरिसंख्यार्थंपुनर्ग्रहणमित्याहततश्चेति। ननुप्रकृतोप्रयाजानांपं
चत्वात्पंचग्रहणमनर्थकमित्यतआह। पंचग्रहणमिति। तथाचोत्पत्तिशिष्टत्वात्सं
ख्यायाः कर्मभेदकत्वमित्यर्थः। यजशेषं। ननुसमिधोयजेतिपंचप्रयाजान्यजतियजय
जेतिशेषमितिसूत्रयोरंजस्येनान्वयाभावादित्यतआह। समिधोयजेति। प्रथममिति
स्यादेवमन्वयोयदिपंचातिरिक्तानामपिपूर्वसंख्यासंबंधोवगतोभवेन्नचैवमस्तीति

प्रत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावः। सूत्र ध्रु॰ ति। ननु यजति त्वा त्तिष्ठन्निति प्राप्तमिति चेन्न। ध्रुवविशेषणार्थमुत्त
रपक्षविवक्षार्थं चेद्धोक्तमिति न दोषः। सूत्र पू॰ मं। वीप्सार्थीयं णमुल्प्रत्ययइत्यभिप्रे
त्य व्याकरोति णमुलिति। नन्वेवं समिद्धतमे पूर्वं प्रयाजानां होमो विहितः सोस्मि
न्पक्षे विरुध्यते इत्यत आह तेनेति। सूत्र नु॰ र्थी॥ प्रति शब्दमध्याहृत्य सूत्रं व्याकरोति
चतुर्थं प्रतीति। कर्मप्रवचनीयत्वादनुक्तो प्रति द्वितीयया वगम्यत इत्यर्थः॥ न
नु प्रवृद्धावितिसूत्रं प्रकृतावनर्थकं प्रयाजानां वृध्य विधानादित्याशंक्य यत्र वृ
द्धिस्तत्रेदमुत्कर्षत इत्यर्थः। ननु प्रवृद्धा एवं सूत्रमवतारयति। अधिकारमिति। सूत्रं ए॰
द्वौ। अत्र द्रव्यैकसाध्यं प्रयाजमादाय संख्यापूरणं तथा च चतुर्थमादायैव गणनं
न पंचमादित्यवधेयं उक्तं समानयनं लाघवादनुयाजेष्वप्यातिदिशति। सूत्रकारः

राम॰
१८

सूत्रं सूत्रं
अ॰ चे। नु॰ ति। ए॰ त्र। ननु प्रयाजावांतरप्रकरणादभिक्रमणवत्प्रयाजांगमेवेदं धर्म
विशेषविधानमित्यत आह मनहीति। तथा चास्य धर्मस्य प्रयाजावांतरप्रकरणे वि
धानाभावान्न तादर्थ्यमित्याशयः। नन्विदं तर्हि कुत्रश्रूयत इत्यत आह इदमिति। सूत्र ना॰
णं। नन्वत्र सूत्रकारेण सर्वत्र शब्दाप्रयोगादेतस्य प्रयाजांगता किं न स्यादित्यत आ
ह सर्वत्रेति। सूत्रं प्र॰ ति। ननु प्रजानामनुमंत्रणं प्रयाजानुमंत्रणमिति तत्पुरुषसमासएव
वसम र्थ इत्याह प्रयाजइति। नन्विदमनुमंत्रणं न यजमानं तस्य दानवाचनादिसूत्रे
परिभाषितत्वादतः समाख्यया ध्वर्यवमित्यत आह तत्रैतदिति। तथा करणमंत्राणामे
वाध्वर्यवत्वमित्याशयः। नन्वस्यानुमंत्रणस्य चोदके नानेकयजमानके कर्मणि सत्राही
नादौ प्राप्तावात्माभिवादिप्रयोगित्वाद्बहुवचनांतत्वेन परिणयः स्यादित्यत आह॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्माभिवादीति। तथा चाशीर्युक्तानामेव मंत्राणां पुरुषसंस्कारत्वेन विकृतौ विपरिणामो
नात्माभियोगिपदयोगिमात्रेणेति भावः। एवं स्त्र्यं सूत्रे मिथुनैः स्त्रीपुंलिंगैरित्यर्थः। प्रया
जावांतरप्रकरणात्सर्वेषामनुमंत्रणानां सर्वत्र प्राप्तौ यथासंख्यलक्षणेन स्थानेन विशेषव्य
वस्थाप्यत इत्याशयेन सूत्रं व्याकरोति। उत्तरत्रेति। ननु श्रुतावनुमंत्रणविधायकानां वाक्या
नां प्रथमादिशब्दयुक्तत्वेन वाक्येनैव तादर्थ्ये न स्थानेनेत्यत आह। तदेवमिति। तथा चक्
तौ वाक्यविनियोजकत्वेपि सूत्रकारेण लाघवात्स्थानविनियोग उक्त इति भावः। यद्वाननुश्रु
तौ यथाद्यो मममेत्याद्यनुमंत्रणानि विशिष्याभिहितानि तथा किमिति सूत्रकारेण नाभिहि
तानीत्यत आह। तदेवमिति। पंचमे संख्यावाचकस्य पंचशब्दस्य स्त्रीपुंकृतविशेषाभावाद
तिदेशानुपपत्तेर्विशेषमाह सूत्रकारः॥ न०मो लिं०च। चकारो यथासंख्यमित्यनुवृत्त्यर्थ इ

त्यभिप्रेत्य व्याकरोति। एतैर्वेति। आम्नात। ननु प्राकृतानुमंत्रणाभिहितत्वादन्येषामविधानात्प्रया
जवृद्धौ विकृतौ नानुमंत्रणप्राप्तिरित्यत आह। प्रयाजधर्मेति। विकृतीनां दर्शपूर्णमासविध्यंतग्रा
हित्वेन प्रयाजानां प्राप्तौ तत्राधिकसंख्याविधानात्तेषां चानुमंत्रणाकांक्षायामनुमंत्रणप्राप्तौ का
रणभूयस्त्वात्तेषां बलाबलं विचार्यत इत्यर्थः। संदेह इति। चतुर्थपंचमाभ्यामनुमंत्रणमुत प्रथम
चतुर्थीभ्यामुत सर्वानुतमेति संदेह इत्यर्थः। अत्र सूत्रेणैव पूर्वपक्षमाह। आगंतूनामिति। नन्व
नुमंत्रणानामभावेन यथासंख्यलक्षणस्थानाभावात्कथं तेन धर्मप्राप्तिरित्याक्षिपति। कुत
एतदिति। यथासंख्यलक्षणस्थानाभावेपि सन्निध्याम्नानलक्षणेन स्थानेन तादर्थ्यमिति स
माधत्ते। स्थानादिति। ननु तत्रैकादशप्रयाजा यजतीत्यविशेषेणाम्नानात्कथं स्थानान्निर्णय इ
त्यत आह। चतुर्थपंचमयोरिति। आगंतवइति। आगंतूनां याज्याः प्रैषाश्च पठ्यंत इत्यर्थः। न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां

ननु मंत्रणां प्राकृतप्रयाजान्वये नैराकांक्षत्वान्नागंतुभिः संबंध उपपद्यत इत्यत

आह। धर्मापेक्षायामिति। अन्यतराकांक्षायाः स्थानत्वादंगानामाकांक्षाभावेपि प्रधाना

नामाकांक्षासत्वेन तदतिक्रमे कारणाभावात्तैर्नैवान्वय इत्यभिप्रायः। द्वितीयं पूर्वपक्ष

सूत्रमाह। प्रै॰गं। ननु सर्वेषां विकल्पेन वा समुच्चयेन प्रथमचतुर्थाभ्यामनुमंत्रणं स्यादि

त्याशंक्य व्यवस्थाकारणमाह लिंगादिति। नन्वेकत्वबहुत्वयोर्द्वितीयतृतीययोः सत्वे

न लिंगस्य व्यभिचारान्न नियमेन प्रथमचतुर्थयोरुपस्थापकत्वमित्याशंक्य तेन नु चेति

॥ लिंगमात्रस्य व्यभिचारित्वेपि विशिष्टस्य तस्याव्यभिचारान्न कोपि दोष इति समाधत्ते नेती

ति। अत्र सिद्धांतसूत्रं सं॰ त्वात्। ननु स्थानलिंगाभ्यामन्येषां धर्मसंबंधस्योक्तत्वात्कथ

मुत्तमधर्मसंबंध इत्याशयेनाक्षिपति कुत एतदिति सूत्रावयवेन समाधत्ते उपायित्वा

५२

नि

रत्न॰

२०

द्विती ति विकृतेष्वोपयत्सुपायिनः तेषां भाव उपायित्वं तस्मादिति सूत्रार्थः। एतद्याकरोति त

मेवेति। ननु स्वतंत्रा एवैते न पंचमविकारा इत्याक्षिपति कथमिति। नवप्रयाजान्यजतीत्य

नेन चोदकप्राप्तप्रयाजानुवादेन नवसंख्या विधीयते सा च न प्रत्येकं विधातुं शक्या प्र

त्येकमेकत्वसंख्यावरुद्धत्वान्नापि समुदितेषु पंचत्वावरुद्धत्वात्। अतः प्रयोगं लक्ष

यित्वा तत्र नवसंख्याविधानं तच्च प्राकृतानां पंचाना [illegible] मभ्यासमंतरेणानुपपत्तेः

प्राकृतानामेवाभ्यास आश्रयितव्य इत्याशयेन समाधत्ते येनेति। नन्वेषां नवत्वसंख्या

युक्तत्वात्संख्यायाश्च कर्मभेदकत्वान्नाभ्यासः किंतु नव कर्माणी स्यात आह। नहीति॥

उत्पत्तिवाक्ययुक्ता हि संख्या कर्मभेदिका न चेयं तथा उत्पन्नेष्व [illegible] वणादित्याशयः॥

ननु दंडकलितवदावृत्तिन्यायेन सर्वेषामेषामयमभ्यासः किं न युक्त इत्यत आह॥

क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंचेति। पंचमस्थाने हिंकारादियाज्यानां तत्रैषाणां च पागत्तेषां चदंडकलितवदाहृ
तौ प्यवधानं स्यादित्याशयः। अत एव न प्रथमस्याभ्यास इत्याह नहीति। यद्वा अत एव
[illegible] न पूर्वमार्गं तव इत्याह नहीति। ननु देवताभेदात्कथं पंचमाभ्यास एतद्गतिचेन्न
दाक्षायणवत्तदुपपत्तेर्न दोषः। अधिकरणसिद्धांतमुपसंहरति तेनेति। ऐं॰ श्च। न
नु सर्वाण्यालभत इतिवत्सर्वाण्यभिघारयंतीति स्रुक्त्रंकर्तं प्लंलाघवान्न ध्रुवादीनां
ग्रहणमित्यत आह ध्रुवादीनामिति। ननु न वा एतत्कस्यैव न देवतायै हविर्गृह्णन्ना
दिशतीति यदाज्यमित्यनेनाज्यमधिस्थालीस्थं हविः शब्देन गृहीतमिति तस्याधिसं
स्कारेण भाव्यमिति कथं तस्य परिसंख्येत्याक्षिपति। तत्कथमिति। स्थाल्यस्याभिघा
रणप्रापकशास्त्राभावान्नाभिघारणमिति समाधत्ते नहीति। कथं न प्राप्तिरित्याह उक्त

शंक्या

राम॰

२९

मप्रयाजेति। कथमेवमवधार्यत इत्यत आह। एवं हीति। ननु हविष्याभिघारमग्निनिसामान्येन
विधानात्स्याल्यस्यापि हविष्ट्वात्तत्स्यात्। न च वाक्यशेषादुत्तमप्रयाजेज्यमानदेवतासंबंधिना
मेव हविषां यातयामत्वदोषपरिहाराया भिघारणविधानान्न तत्र प्रसक्तिरिति वाच्यं। तस्योपस्त
रणाभिघाराभ्यां ध्रुवाप्यायनेन च तत्राभीज्यमानदेवतासंबंधित्वादिति चेन्न। यदाग्नेयोष्टा
कपालो मावास्यायामित्यादिना पुरोडाशस्यैव साक्षात्साधनत्वेन विधानात्। तस्मादाज्यस्यो
पस्तीर्य द्विर्हविषो वदायाथोपरिष्टादाज्यस्याभिघारयतीति सैषाज्येन मिश्राहुतिर्हूयत इति वदुप
स्तरणप्रत्युपस्तरणयोः संस्कारत्वेन विधानात्। मिश्रत्वश्रवणाच्चाज्यस्य हविष्ट्वाभावादुत्तमप्र
याजाभीज्यमानदेवतासंबंधित्वाभावान्न तस्याभिघारणप्रसक्तिरिति दिक्। तस्मात्साधूक्त
माज्यस्थालीव्युदासार्थमिति। यत्तु क्रमार्थं तद्ग्रहणं तन्न। मुख्यक्रमाद्वाज्यभागप्रयुक्त्या ध्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२

वाभिघारस्य हविषः पूर्वं प्राप्तत्वेन तादर्थ्ये वैयर्थ्यापत्तेः। यदपि पुरोडाशयोर्मध्ये प्युपां प्रयाजरू
पमुख्यक्रमेण ध्रुवाभिघारणं प्राप्य नेकालभेदा तन्माभूदिति ध्रुवाग्रहणं कालभेदेपि प्रसंगा
तादर्थ्योपपत्तेर्न मध्ये तत्प्रसक्तिरिति तत्त्वं। उपसंहरति। तनश्चेति। ननु का गतिः सूत्रे प्रयु
क्तस्य सामान्य हविःशब्दस्येत्यत आह। हविःशब्द इति। हविःसंस्कारो वा प्रयाजशेषप्रतिप
त्तिरिति संदेहे पूर्वपक्षमाह। हविःसंस्कार इति। द्वितीया श्रुत्याभिघारणस्य हविःसंस्कार
कत्वेन विनियोगात्। तृतीयया शेषस्य तादर्थ्ये न विनियोगाच्च हविःसंस्कार इति प्राप्ते सिद्धां
तमाह। प्रयाजशेषेति। अन्वप्रयुक्तानुनिष्पादि प्रयाजशेषस्य प्रतिपत्तिमिच्छमानस्य तद्वि
धीयत इत्यर्थः। नन्वयातयामत्ववाक्येन हविषामपि संस्कार्यत्वप्रतीतेः कथं प्रतिपत्तिविधि
रित्यत आह। दृष्टार्थत्वादिति। तथा चायातयामवाक्यमर्थवाद इति भावः। ननु कोयं दृष्टोर्थ इ

२२

मी॰

त्यत आह दृष्टो हीति। अत इति। नन्वशेषहोमविधानाच्छेषस्याभावेन प्रतिपत्त्यभा
वान्न दृष्टार्थत्वं प्रमाणवदिति चेन्न। हविःसंस्कारपक्षेपि समानत्वात्। अथाज्य
स्य संसर्गिद्रव्यत्वेन स्रुग्संसृष्टेन हविःसंस्कारो विधीयत इति चेत्समानमस्मा
कमिदं स्रुग्संसृष्टस्यासंकराय प्रतिपाद्यत्वात्। ननु प्रतिपादितेप्याज्यसंसर्गस्य
सत्वात्तेन संकरापत्तिरिति चेन्न तस्यानिर्वार्यत्वेन संकरस्यादोषत्वात्। नन्वेवं
द्वितीयातृतीयाश्रुतिभ्यां हविःसंस्कारार्थताऽवगम्यत इति यदुक्तं न दन्नद्यलक्ष
णया द्वितीयाया तृतीयार्थत्वं तृतीयायां द्वितीयार्थत्वमित्याह यच्चेत्यादिना। ननु
सुपां सुप इति व्यत्ययानुशासनात्कथं लक्षणोच्यत इति चेन्न। अनुशासनस्य लक्ष
णानियामकत्वात्। प्रयोजनमिति पशौ चोदकप्राप्तेषु प्रयाजेषु पुरोडाशस्यापि

श्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत्र

२३

स्वसंस्कारार्थं धारणं प्रयुज्य तद्दत्यर्थः। प्रतिपन्नौ लिलिति। प्रतिपन्नेर्द्रव्याप्रयोजकत्वादित्यर्थः। आ
न। नन्वाज्यभागौ हविर्यस्य स तथेति व्युत्पत्त्याज्यभागपदं देवतापरं। आज्यंच तद्भागश्चेति व्यु
त्पत्त्या द्रव्यविधायकं वास्यादित्यत आह। आज्यभागाविति। तिद्रव्यदेवताविधायकयोः शा
स्त्रांतरयोः सत्वादिदं कर्मनामधेयमित्याशयः। नन्वनयोर्देवताभावान्नयागत्वमित्याशंक्य
देवताविधायकमाह। सचेति। ननु कथमेतादृशेनशब्देन देवताविधिरित्यत आह। स्मर्यतद
ति। आग्नेयमिति। अत्राग्नेरिदमाग्नेयमिति विग्रहः। ननु सर्वत्राग्निर्देवतास्येत्याग्नेय इति
बहुव्रीहिसमासत्वेन विग्रहस्यादर्शनात्कथमेवं विग्रह इति चेन्न। बहुव्रीहेरपि चित्राणां गवा
मयमिति प्रथमांतत्वेन विग्रहात्। अन्यथा षष्ठ्यंतत्वेन तत्पुरुषवदन्यपदार्थस्याप्राधान्याप
त्तेः। अतोत्रापि बहुव्रीहिसमानत्वादग्नेरिदमाग्नेयमिति विग्रहोयं युक्त इति भावः। तदुक्तं॥

२३

सूत्र

अभिधेयो बहुव्रीहिर्यद्यप्यस्येति कथ्यते। तथापि प्रथमांतेन तुल्योसौ प्रती यत इति। चतुर्गसुं आ
हवनीये यजतयो ध्रुवायाइति परिभाषितं तत्रावदान संख्या न निर्णीता तन्निर्णयार्थमिदं सू
त्रं। एतद्व्याकरोति। सवषट्कारास्विति। यद्यजतद्दत्युपक्रम्यो तरत्रेदं वा अनुवाक्यायाज्या
सूत्र
यवषट्कार इति यजति धर्मिणां दर्शनात्सूत्रे सवषट्कारासु इत्युक्तं। जुहोतिषु नचोदकप्राप्तं। अं
मिति। अनुपपत्तिरिति। स्रुवपूर्णतानुपपत्तेरित्यर्थः। अत्र पूर्वप्रतिस्रुवाभिघारणं प्रतिस्रुवग्रह
णामिति वक्तव्येयदवदायावदायेत्युच्यते त दाज्यप्रधानकाहवनी येयजति ष्वेव ध्रुवातो ग्रह
णं तदभिधारणं च नोपस्तरणाभिघारणादिष्विति बोध्यं। उपपादितं चैतत्परिभाषायां भाष्य
कारेण। तत्रैतदिति। नन्वाचार्याभिप्रायादयं निर्णयो भविष्यतीत्यत आह। नवेति। संशयमु
पपाद्य सिद्धांते नैवोपक्रमते। तत्रेति। ननु विरुत्यनुप्रवृत्तिमात्रेण चेन्निर्णयस्तदेतरयोर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितत्रप्रवृत्तिदर्शनेन प्रकृतो विकल्पप्रसंगइत्याशंकते। नन्विति। सहानुवचनग्रहणेनत्वयानुव
चनविधायकयोर्वचनयोरनन्यपरत्वेन चोदकप्राप्तपूर्वानुवचनबाधेन नद्विधावेवतात्पर्यमवधा
र्यतइतिसमाधत्ते। सत्यमेवमिति। अ॰णात्। आ॰णात्। प्रै॰षात्। हो॰रात्। अत्रसूत्रे सर्वत्रानभि
व्याप्तौ। अधिकारमुपजीवन्नाह सूत्रकारः। सौः णात्। सूत्रनुपाकरणं त्रातारंमप्रेरणा। उ॰षात्। हो॰
रात्। अत्रापव्याहरणंयज्ञादपेतंव्याहरणं विहितमुत्रोच्चारणादतिरिक्तं संस्कृतंप्राकृतं वाश
ब्दोच्चारणंकृत्वर्थतुप्यात्प्राति षिध्यतेइतिबोध्यं। आ॰म्यं। पक्षांतरमाह। सूत्र॰ सै॰वा। तथाच्च वि
कल्पइतिभावः। ह॰त्वा। नन्वत्रनचरतिक्रिमानुषंगोयुज्यते अनेकसूत्रैर्व्यवधानादित्यत आ
ह। चरतीति। तथाचाध्याहारेनानुषंगइतिभावः। यद्वा चकारेणव्यवहितमप्यनुषज्यतेइत्य
र्थः। पु॰ स्यौविष्णु॰नात्। नन्वेवमपिनामावास्यांनिर्णायकं किंचिदुपन्यस्तमितिचेन्नाऐं

ऊ

राम· २७

द्राग्नात्पूर्वं वैष्णवयाज्यापुरोनुवाक्यापाठदैंद्राग्नस्यत्वमावास्यायांनिर्णीतत्वाद
स्याप्यमावास्यानिर्णयइत्यदोषः। या॰तः। यावच्छब्दस्यावधारणार्थमभिप्रेत्याक्
रोति। यावंतीति। ननुप्रधानयागवत्स्विष्टकृत्सपिपुरोडाशभेदादावृत्याभवितव्यमि
त्यतआह संप्रतिपन्नेति। देवतैकत्वेनैंद्रदधिपयसोरिवतंत्रेणप्रक्षेपइत्यर्थः। नचैव
मग्नीषोमीयाज्यपुरोडाशयोरपितंत्रेणप्रक्षेप प्रसंगइतिवाच्यंतयोरुच्चैस्त्वोपांशुत्व
रूपविरोधिगुणयोगेनावृत्तेर्न्यायसिद्धत्वात्। नन्विदमर्थकर्मयुतप्रतिपत्तिकर्मा
थवोभयकर्म। नाद्यः परप्रयुक्तद्रव्यानुनिःपादित्वात्। नद्वितीयः। देवतोद्देशवत्त्वात्
॥ नहिप्रतिपत्तौदेवतोद्देशः कथमपियुज्यते नापित्तृतीयः। एकस्मिन्वाक्येसाध्यद्व
याप्रवेशेनवाक्यभेदप्रसंगात्। यागेनद्रव्यंभावयेत्। कृत्स्नपकारंचेत्यतआहप्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्सर्थकर्मेति। नचसाध्यद्वयप्रवेशेवाक्यभेदः यच्च क्रुयान्न कुर्यादितिवचनव्य
क्तौतदभावात् उपपादितं चैवमादीनामुभयार्थत्वंप्रागिति। नेह तदर्थंप्र... पसते॥
अतएवेति। प्रतिपत्त्यंशमादाय तत्रापिप्रवर्त्तत इत्यर्थः। नं. म.। ननुपूर्वमुत्तरशब्द
स्यसमस्तत्वेनततोनिःकृष्यपरामर्शाभावादिदंसूत्रमनुपपन्नमित्यतआह उ
त्तरत्तएवेति। अथशब्दानुशासनंकेषांशब्दानांलौकिकानांवैदिकानामित्यादौसम
स्तादपिनिष्कृष्यशब्दपरामर्शदर्शनात्तद्वदत्राप्युपपत्तेरितिभावः। नाज्यादशेषादि
तिसूत्रमवतारयितुंपूर्वपक्षमाह शेषादिति। ना.षात्। अं.मि.। सूत्रस्यसाकांक्ष
त्वात्तन्निराकांक्षीकरणसमर्थशेषाध्याहारेणव्याकरोति। स्विष्टकृदाहुतिमिति॥
नन्विदमनुपपन्नंसंसर्गनिषेधशास्त्राभावादित्याशंक्य निषेधकप्रमाणमाहसवा

इति। नि.यात्। ननुसंचरशब्देनब्रह्मणोपिगमनमार्गः अग्निधोप्यग्निसंमार्गगमन
मार्गस्यादित्यतआह संचरस्त्रैवेति। ननुप्राधानयागार्थंगंतुंसंचरसंस्कारो विधेयः। तस्य
चनिर्वृत्तत्वान्निःप्रयोजनमेव संचराभ्युक्षणविधानमित्यत आह तस्यचेति। सन्निधा
नादित्यर्थः ननुसन्निधानाच्चेदनुयाजांगंतदासन्निधानांतरेणप्राशित्रसमर्पणार्थ
मेवस्यादित्याशंकतेननुप्राशित्रेतिप्राशित्रसमर्पणेसंचरस्यवैकल्पिकत्वेननित्यव
दाम्नातस्यतादर्थ्येनित्यानित्यसंयोगविरोधप्रसंगःस्यादित्याशयेनसमाधत्तेनेति॥
ननुप्रकरणेचप्रधानार्थमेवेदंविधानंनानुयाजार्थंनचतादर्थ्ये निःप्रयोजनताभूतो
पयोगिनोपिप्रस्तरप्रहरणवत्संस्कारस्याविधातुंशक्यत्वादित्याशंक्यभूतसंस्का
रापेक्षयाभाविसंस्कारस्याभ्यर्हितत्वादित्याशयेनोपसंहरति। तेनेति। तदभावइति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इडांता आतिथ्या भवतीत्यनेनातिथ्यायाइडांतां गरीतिविधानेनानुयाजानां बाधात्तत्वाद
र्थ्येनि संचराभ्युक्षणस्यापि तत्र बाध इत्यर्थः। चोदनालिंगातिदेशेन संचराभ्युक्षणस्या
नुयाजद्वारा पशौ प्राप्तौ तत्र स्विष्टकृदनुष्ठानस्य पुरोडाशानंतरं पश्वनंतरं च विधानात्त
दनंतरं च प्रकृते संचराभ्युक्षण विधानात्क्व तत्तदनुष्ठेयमिति संदेहे संनिकर्षात्पशु
स्विष्टकृदनंतरमित्याह। पशौ चेति। अत एव ज्योतिष्टोमे सौम्ययागादनंतरमित्याह। ज्यो
तिष्टोम इति। प्रकृतेनिधाये त्यनेन त्क्वाश्रुत्या स्विष्टकृदानंतर्यस्य बोधनाद्विकृतावपि त
दानंतर्ये बाधकाभावाज्ज्योतिष्टोमेपि तृतीयसवनप्रधानस्विष्टकृद्यागानंतरमेवो
चितमित्याशयेन स्वाभिमतमाह के चिन्त्वेति। प्राशित्रपदार्थस्य लोके प्रसिद्धत्वात्
किमवदेयमित्यत आह। प्राशित्रमितीति। याज्ञिकानां रूढ्या प्राशित्रशब्दस्य ब्रह्मभा

शा
रा०
२८

गवाचकत्वमित्यर्थः। ननु माध्यंदिनीयानां तद्वैचतुरवत्तं भवतीति प्रकृत्युक्तोपंचा
वत्तमेव भवतीत्यविशेषेण विधानाद्विकल्पो भविष्यतीत्यत आह। तथा चेति। तथा
च विशेषपाठात्प्राशित्रे वदानद्वयनियम इति भावः। ननु पिप्पलशब्दस्य वृक्षे रूढ
त्वात्परिमाण विधानमशक्यमित्याशंक्याह। पिप्पलमिति। प्रधानावदानाद्विवदुप
स्तरणाभिघारणयोर्द्वयोरपि प्राप्ताविदमाहाज्यं वेति। अत्र प्राशित्रावदानं चतुर्धाक
रणवत्किमाग्नेयादेवउत्तेडादिवदुभयोर्हविषोरवदेयमिति संदेहे वचनादाग्नेय
यादेवेति पूर्वपक्षमाहाग्नेयादिति। उक्तं पूर्वपक्षं विषयांतरेति दिशति। सू० आं० गा
र्श्वे। प्राशित्रेणाविशेषश्रवणादाग्नेयस्य मुख्यत्वाच्च ब्रह्मयजनादिभागानां ततए
वावदानं युक्तमित्याह तांश्चेति। नन्वेवं पाठक्रमात्प्राशित्रावदानानंतरं भागग्रहणं स्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्दिसत आह सचेति। पूर्वपक्षानंतरं तत्सिद्धांत एव वक्तुमुचितो नांतरान्यात्किं चिदि
त्याक्षिपति। तत्किमर्थमिति। पुनः पुनः सिद्धांत कथने गौरवात्लाघवेन तत्रैव सिद्धांत
कथनमित्याशयेन समाधत्ते चतुर्द्धाकरणेति। अर्थ(सूत्र)दाज्यं भागग्रहणविधायकसूत्र
व्यवधानेन प्राशित्रोपस्थितेरभावात्तत्रत्रं साकांक्षत्वेन बोधकं न स्यादिति पूरयित्वाव्या
करोति। प्रक्रांतमिति। ननु रौद्रादिमंत्रोच्चारणाभावादपांस्पर्शनमनुपपन्नमित्यत
आह। रुद्रिय इति। अरुद्रिये रुद्रधर्मातिदेशार्थ इति भावः। तदभाव इति सर्वहुतादा
वित्यर्थः। ननु यावद्द्वविरित्यनुपपन्नं स्विष्टकृदादिडायाः प्रतिपत्तित्वेन द्वयोश्च पुरोडा
शयोः प्रतिपाद्यत्वेनोभयोरपि ग्रहणस्य प्राप्तत्वादिति चेन्न। आग्नेयादिति पूर्वपक्ष
युक्तिपादकसूत्रावयवं दूषितांतः करणं मुख्यत्वादाग्नेयादेवेडावदानं भविष्यतीति बु(द्ध)
स्य।

व

राम॰

२७

द्धिः स्यात्तन्माभूदिति यावद्धविरिति। अत एवाह। प्रतिपत्तित्वादिति। पंचावत्तत्वस्य प्र
कारांतरेण प्राप्तत्वात्संचावत्तग्रहणमाक्षिपति। ननु चेति। एकदेशिमते समाधत्ते स
र्वेषामिति पुरोडाशस्य प्रतिपाद्यत्वे न संस्कार्यत्वादाज्यस्य तु तद्गुणत्वात्तानयोः सा
म्यं युक्तमित्याशयेन दूषयति तदेतदिति। स्वमते न समाधानमाह तेनेति। नन्वत्र पंचा
वत्तत्वग्रहणाभावे प्यतिदेशात्तत्र पंचावत्तता प्राप्यते इत्याशंक्य तेन नु चेति। तत्र प्रति
पाद्यपुरोडाशाभावेनाज्यमात्रावदानस्य प्राप्तिः स्यादिति समाधत्ते नेति। य(सूत्रे)रोति। ननु
भागांश्चेत्यनेन प्राशित्रावदानानंतरं यजमानादिभागावदानानां विहितत्वान्नात्रापि वि
धानं कर्तव्यमित्यत आह अयं चेति। सूत्रे यजमानपदमग्नीद्ब्रह्मणोरप्युपलक्षणं तयो
रपि भागस्याग्ने विनियोगात्। ननु पाठक्रमाद्यजमानभागस्य पूर्वं ग्रहणमिति चेन्न॥

द्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजमानग्रहणस्योपलक्षणत्वेनुक्रमनिर्णायकत्वाभावात्। नन्वेवं तर्हि केन क्रमेण त
दनुष्ठेयमित्यत आह ततश्चेति। इडांतेति। इडा. कि। नन्विडातः पूर्वं जनस्य विहितत्वान्न
तादर्थ्येन सार्थमित्याशंक्य होतुरोष्ठ निलुंपन विधिपरे वाक्ये तामेतत्सुरा रक्षोभ्य इत्य
त्र तच्छब्देनेडायाः परामर्शात्तेन तत्र विधिकल्पनमित्याशयेनाह। तथाचेति। ननु प
र्वशब्दस्यामापूर्णयोः प्रसिद्ध्यात्तयोः कालत्वेनांजनकर्मत्वाभावादित्यत आह पर्वश
ब्द इति। अं. वत्। इ. चा। स. ते। इ. स्येति। नन्वाग्नेय इत्यत्राग्नेः कार्ययोगित्वाभावेनोपलक्ष
णत्वात्तस्य चाग्नीषोमीयेपि समानत्वात् द्वयोरपि चतुर्द्धाकरणं विधीयत इत्यत आह।
वचनादिति। ननु समाख्यया चतुर्द्धाकरणे ध्वर्योरेव कर्तृत्वमित्यत आह चतुर्द्धाकर
णस्येति। नन्वस्तुन्वादेशार्थत्वं तथापि किमायातमध्वर्युकर्तृकत्वमित्यत आहत

रा.म.
२८

स्य चेति। त्काश्रुत्याद्बृहस्पतिसवस्य वाजपेयांगत्ववच्चतुर्द्धाकरणस्यन्वादेशार्थ
त्वेन विनियोगादिति भावः। यजमानीयस्यद्रव्यस्याध्वर्युणान्वादेष्टुमशक्यत्वाद
र्थाद्यजमानकर्तृकत्वं तत्रेति भावः। पुरोडाशस्य यजमानेन देवतोद्देशेन त्यक्त
त्वान्न तस्यापि स्वामित्वमित्यत आह त्क्रापस्ययेति। चतुर्द्धाकरणस्यन्वादेशा
र्थत्वसाधनप्रयोजनमाह सत्रेष्विति। ब. शाति। ननु बर्हिषदं करोतीत्युक्तत्वान्ने
नैव तत्रादेशस्यापि प्राप्तेः पुनर्बर्हिर्ग्रहणं न कर्तव्यमित्यत आह। बर्हिषीतीति।
तथाच बर्हिष्येवेत्यर्थः। नन्वादेशशब्देन समर्पणमेव विधीयत इत्यत आह आ
देशश्चेति। समर्पणस्याग्रे एकैकमाहरतीत्यनेन विधानादित्यर्थः। अत्रेदं चिंत्यते
चतुर्धाकरणं किमाग्नेयस्यैवोताग्नीषोमीयस्यापीति संदेहे सूत्रेणैव पूर्वपक्षमाह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुत्र

ऽ॰षात्।सूत्रं व्याचष्टे।उभौचेति।नन्वाग्नेयइत्यत्रेतरनिरपेक्षतद्धितश्रवणात्कथमविशेष
इत्याक्षिपति।कुतइति।स्वशाखायां पुरोडाशमात्रश्रवणेन विशेषाभावादुभयोरपि चतुर्द्धी
करणमित्याशयेन समाधत्ते।अविशेषादिति।ननु शाखांतरे आग्नेयं चतुर्द्धा करोतीति वि
शेषश्रवणात्कथमुभयोरपीत्यस्वरसेनास्य सूत्रस्य व्याख्यांतरमाह।किंचेति।इदमेव सू
त्रं न अध्याहारेण न अध्यत्यासेन वा सिद्धांतार्थप्रतिपादकं सिद्धांतमाह।अत्रोच्यतइति।न
नु पूर्वमुदाहृतो विशेषइत्याशंकते।यद्यपीति।अविशेषस्य साकांक्षत्वेनास्पष्टत्वान्न विशेषे
णैवोपसंहारो युक्तइत्यभिप्रेत्य सिद्धांतमाह।तथापीति।नन्वग्निसंबंधादाग्नेयत्वं तच्चाग्नी
षोमीयेपि समानमित्याशंक्याह।नचेति।ननु सामर्थ्ययोग्यता सा चाग्नीषोमीयेप्यस्तीत्य
तआह।यद्यपीति।निरपेक्षतालक्षणं हि सामर्थ्यं न चात्र तदस्तीति भावः।नन्वेवं वचनन्याया

२९

भ्यां सिद्धांतस्यातिस्पष्टत्वेन पूर्वपक्षाभावादिदं सूत्रमनुपपन्नमित्याशंकते।यद्येवमि
ति।मंदविषन्यायेन मंदबुद्धीनां शंकानुपपत्तये सूत्रमितिसमाधत्ते शंकेति।ननूक्तं वच
नस्यातिस्पष्टत्वान्न शंकेत्यस्वरसादाह।अपिचेति।नन्वाग्नेयादितिसूत्रेतत्वात्कथ
मुभयोरित्याक्षिपति।कुतइति वचनस्याविशेषपरत्वान्नाग्नेयमात्रादितिसमाधत्ते
वचनादिति।नन्वेवमाग्नेयादितिसूत्रंव्यर्थंस्यादित्याशंकते यद्येवमिति।तस्य वचन
स्य मूलं ब्राह्मणानुसारेणागुणविधिपरत्वान्नाग्नेयविधायकत्वमितिसमाधत्ते नेति
॥तस्मादाज्यस्योपस्तीर्य द्विर्हविषोवदायेत्यनेन प्राशित्रस्य हविर्मात्रसंयुक्तत्वात्सा
मान्येप्युपदेशात एव प्रवृत्तिरित्याह तस्मादिति।भागान्नां तु पूर्वार्द्धं पु रोडाशस्यत्र
शीर्येति पुरोडाशसंयोगात्तद्गतस्य वचनस्याविवक्षितत्वेपि पुरोडाशत्वस्य विवक्षितत्व

त्वात्सान्नाय्येन प्रवृत्तिरित्याह भागांश्चेति। नन्वाग्नेयं चतुर्धा करोतीत्यत्र पुरोडाशसं
योगाभावात्सान्नाय्येपि चतुर्द्धाकरणं प्रवर्तत इत्यत आह। याज्ञिकेति। अत्रापि पुरोडाशं
चतुर्द्धा कृत्वेति पुरोडाशसंयोगोस्त्येवेति भावः। नन्वेकदेवत्यत्वसामान्यादतिदेशेन
सान्नाय्येपि चतुर्द्धाकरणं प्रवर्तयिष्यत इत्याह। प्रकृतौ हीति। तथा चोपदेशातिदेशयो
रभावात्सान्नाय्येन चतुर्धाकरणं प्रवर्तत इति भावः। अत्र° पतति। बि°स्येति। ननु चतु
र्द्धाकरणस्य पुरोडाशसंस्कारकत्वाद्द्विदेवत्यसान्नाय्यादावप्रवृत्तिः। जपस्य तु दृष्टा
र्थत्वेन प्रकरणपरिग्रहीतत्वात्पूर्णमासविध्यंतग्राहिषु सर्वत्र प्रवृत्तिरित्यत आह चतु
र्द्धाकरणे चेति। ननु जपस्य चतुर्द्धाकरणांगतायां श्रुतिलिंगादिप्रमाणाभावात्कथं तन्नि
वृत्तौ निवृत्तिरस्येत्याशंक्य प्रकरणापेक्षया बलवद्वाक्यप्रमाणमाह। तदन्वेति। ए°ति।

राम॰
३०

नन्वस्य प्रकृतिग्रभ्योहरणविधानादन्वाहार्यवत्परिक्रयार्थमिवेदं प्रयुक्तमित्यत
आह। तच्चेति। ननु पक्वान्नोपहारसामर्थ्यमन्वाहार्ये व्यभिचारीति। आशंकते। अन्वा
हार्येपीति तत्र पक्वान्नोपहारसामर्थ्येप्यानंतर्यत्वेन तदानीं भक्षनियमाभाव इत्याश
येन समाधत्ते नेति। नन्वस्यानत्सर्थत्वेपि भक्षणार्थत्वं किं न स्यादित्यत आह। अद्भ्वे
ति। घ्रौ°वत्तं। ननु षडवत्तशब्दादवयवार्थप्रतीतेर्यौगिकः षडवत्तशब्द इत्येकदेशि
मतं दूषयितुमुपन्यसति तत्रेति। अग्नीधे आदधातीति वचनेनाग्नीधे समर्पणमात्र
विधानात्षडवदानविधायकाभावान्न षड्भिरवदानैः षडवत्ततायां किंचित्प्रमाण
मित्याशयेन समाधत्ते तत्पुनरिति। नन्ववय वार्थप्रतीत्यन्यथानुपपत्त्योपस्तर
णाभिघारणे अर्थाद्विधीयेते इत्याशंकते कथमिति। षडवदानविधायकाभावे।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नावयववार्थाभावात्षडवत्तशब्दस्याश्वकर्णादिशब्दवद्रूढ्याप्युपपत्तेर्नोपिस्तर णाद्याक्षेपकत्वंतस्येत्याशयेनसमाधत्तेप्रत्यस्तम्नि नेति। प्रा॰ति। अथद्वितीय मिति। नन्विदमनुपपन्नंशतपथब्राह्मणेविध्यभावात्। अतएततत्सूत्रकारेण नोपनिबद्धमितिचेन्नशाखांतरेविधायकसत्वात्। स्वशाखायामपिविरुद्धा र्थप्रतिपादकयोर्द्योःपृथिवीशब्दयोःकथमप्येकवाक्यतानुपपत्तेर्वाक्यभेदेन लिंगानुगतविनियोगश्क्यत्वाविहितत्वाच्च। नन्वेवंचेत्कथंनसूत्रकारेणनोपनिब द्धमित्यतआहश्रुतमपीति। नचेडाव्यतिरिक्तअग्निभागोनास्तीतिशंकनीयं। प्रा शित्रंचेत्रगच्चयजब्राग्निधआदधातीतीगतोभेदेनव्यपदेशात्। आं॰पतिसूत्रमाक्षि

पत्ति। तत्रयजमानेति अत्रयजमानस्यप्राप्तत्वेपिपत्नीसंयाजेडायामाशासानैक

वाक्यतापन्नत्वेनतद्बाधोमाभूदितियजमानस्यप्राप्तत्वेपिग्रहणमितिसमाधत्ते। एवंहीति। उ॰त्का:॥ ।पं॰श्र। ननुचोदनालिंगातिदेशेनयावद्रक्केगहमेधीयादौप्राशित्रेडाभागानांकार्यद्वारेणप्राप्तौ तत्राज्यभागविधानेनप्रयाजादीनांनिवृत्तिवदेतेषामपिनिवृत्तिःस्यादित्यतआह। सावेषे ति। आरादुपकारकानांनिवृत्तावपिसन्निपातिनांद्रव्यसंस्काराणांनिवृत्तिरित्यर्थः। पू॰ति। अ थपवित्रयोर्मार्जयंतइतिश्रुतौसूत्रेचसप्तमीनिर्देशादाधारभूतेपवित्रेनदाधेयभूताआपो मंत्रलिंगादवगम्यंतइत्यतआह। तृतीयार्थइति। ननुश्रुत्याधारार्थत्वेलक्षणयास्तृतीया र्थत्वंनचश्रुतिसंभवेलक्षणायुक्तेत्यतआह। नह्यत्रेति। तथाचमुख्यार्थस्यायोग्यत्वादेवश्रु तिबाधइतिभावः नचात्रासंतलक्षणासामान्यतस्तृतीयार्थेपिसप्तम्यनुशासनादित्याहसु पांहीतिलिंगाच्चेति। पवित्रपूताइति। पवित्राभ्यांपूताइत्यर्थः। अत्रैकदेशिमतंदूषयितुंपठति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षण

के विन्चेति दूषयति। तत्पुनरिति। ननु मंत्राणामविधायकत्वेप्युदकविधायकप्राप्तिः
स्यादित्यत आह उदकेति। ननु विधायकाभावेपि संभृज्यर्थकरणत्वान्यथानुपपत्त्या
पाकरणत्वं भविष्यतीत्यत आह नचेति। ननु पवित्रयोः साधनत्वविधायकेनापां साधन
त्वं न वार्यते तथा च समुच्चयो भविष्यतीत्यत आह यदिचेति। ननु पवित्रपूता इति तृतीया
तत्पुरुषे सत्वात्कथं न समास इत्यत आह। सामर्थ्याच्चेति। सापेक्षत्वेन सामर्थ्याभावादित्य
र्थः। अत्र प्रकरणांतरसमधीतो मंत्रो वाक्येन विनियुज्यते स संपूर्ण एव विनियुज्यते अ
न्यत्र तथैव विनियोगादित्यत आह। मंत्रश्चेति। ननु दुर्मि त्रियाइत्यस्यानर्थक्यं माभूदिति
निवृत्तामप्याकांक्षामुत्थाप्यैकवाक्यतां कल्पयित्वान्वयो भविष्यतीत्यत आह। नचेति
॥ तथा च प्रदेशांतरे विनियुक्तत्वेनानर्थक्याभावादिति भावः। नन्वाथैक्याभावेपि परादि

राम
३२

४ व्यापारे सर्वत्र स्थाल्यस्य विधानादन्वाहार्यस्यापि प्राकृतभावे नोपकारक ×४

नाद्रवंति इति न्यायेनैकवाक्यता कल्पतामित्यत आह नचेति। यत्नात्रशाकोपे दित्यर्थः॥
यथेति। एवं सति तत्र सभिदंतग्रहणमुपपन्नतरं भवतिय॰रीति। त्वा॥ अत्र॰ति॥ भा॰ति॥ यज॰
ते॥ अन्वा॰ति। ननु स्थाल्यस्य क्रत्वर्थत्वादन्वाहार्यस्य पुरुषत्वान्नतदभिघारणे स्थाल्य
स्य प्राप्तिरित्यत आह सर्वार्थेति। लाघवात्प्राकृतभावे नोपकारकत्वात्तस्यापि स्थाल्ये
नैवाभिघारणमित्यर्थः। ननु मंत्रे आत्माभिवादिपदयोगात्स्वत्य गात्मगाशीर्योगाच्चालंभ
स्यापि याजमानत्वं स्यादित्यत आह आलंभ इति। ननु मंत्राणां स्मारकत्वेन विधायक
त्वाभावान्न याजमानत्वमालंभस्येत्यस्वरसादाह दानेचेति। आलंभस्य सन्निधाने
न दानार्थत्वाद्दानस्य तु याजमानार्थत्वादसंदिग्धमालंभस्यापि याजमानार्थत्वमित्य
र्थः। आलंभे समाख्यया ध्वर्योः कर्तृत्वावधारणात्तद्बाधकबलवत्प्रमाणाभावाध्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यैवंतत्रस्थितमेवेत्याशयेनसिद्धांतमाह।ध्वर्योर्वेति।विकृतावाग्रयणादौचोदना
लिंगातिदेशेनपूर्णमासगतसर्वधर्मप्राप्तौतत्रदक्षिणांतरविधानादन्नवाचके
नोर्गशब्देनदक्षिणांतरस्यगवादेःप्रकाशयितुमशक्यत्वादूहेनप्रवर्तनइत्याह।
उर्गसीत्यस्येति।ननूर्जमपिधेहीत्यत्रापरोर्गशब्दस्यान्नविषयत्वेनसमवेतत्वा
दाग्रयणादावूहेनप्रवृत्तिरित्येकदेशीमतंदूषयितुमनुवदति।ऊर्जमिति।ऊर्जम
यीत्यत्रोर्गशब्दस्यप्रकृतान्नरूपदक्षिणावाचकत्वाभावेनसमवेतत्वाभावान्नो
हेनप्रवृत्तिर्युक्तेत्याशयेनदूषयतितत्पुनरिति।एतदेवव्यतिरेकमुखेनाह।नहीति
।ननुगवादौमंत्रवदभिघारणस्याप्यन्वाहार्यधर्मत्वेनप्रवृत्तिःस्यादित्यतआह।अ
भिघारणंत्विति।नन्वभिघारणस्यदृष्टोपकारानुपलंभेनादृष्टोपकारस्यतुक

राम॰
३३

ल्पनात्तस्यचगवादावपिसंभवात्कथमर्थलोपात्तस्यबाधइत्याशंक्यास्यदृष्टार्थ
त्वमाह।स्यादिन्नेहीति।तथाचार्थलोपाद्गवादावस्यबाधइत्याशयः।ननुब्रह्मयजमा
नांतराहरणस्यार्थलोपाभावाद्बाधोनस्यादित्यतआह।ब्रह्मयजमानयोस्त्विति
विरोधात्तदपिबाध्यतइत्यर्थः।अतएवगवादौपाकस्यापिबाधः।यत्रतुविरोधोना
स्तितत्रतत्प्रवृत्तिरपिनवार्यतइत्याह।वाससस्त्विति।सोर्णा।नन्वाहार्यस्यचरुवि
शेषणात्पुल्लिंगत्वेनभाव्यमित्याशंक्यतेसदक्षिणेतीति।नन्वेवंन्वाहार्यंदक्षिणांददा
तीत्यत्रददातिश्रुत्यामंत्रोदीतिकर्तव्यतयाकर्मानुरूपदानाद्यान्वाहार्यदानस्या
त्रेयदानवद्दृष्टार्थत्वमित्याशंकायामाह।अयंचेति।अन्वाहार्यइत्यर्थः।तथाचक
र्मकरेभ्यःऋत्विग्भ्योदीयमानस्यापेक्षिततद्दानतिद्वारेणान्वाहार्यस्यदृष्टार्थत्वमि

नैं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्याशयः।अन्वाहार्यस्यपरिक्रयार्थत्वसाधनप्रयोजनमाह।ततश्चेति।उ(सूत्र)श्चे।उदगुद्वासनमि
ति।यदादक्षिणाग्नेरुद्वासयतितदेत्यर्थः।नन्विदानीमुदगुद्वासनंपदार्थतयाविधीयतेअदृ
ष्टार्थताप्रसंगात्।नचवेदितोयत्रकुत्रचिदुद्वासनेप्राप्तेउदगितिनियमविधानमितिवाच्यं।हविषा
सहपाठात्।हविषांद्युद्वासनसमयएवोदक्ताविधीयतइतिसंदिग्धं।तैःसहपाठादन्वाहार्यस्याप्युद्वा
सनसमयएवोदक्ताविधीयतइतितत्वं।स(सूत्र)द्वीति।ननुसूत्रेसमस्यतीत्यत्रप्रतियोग्यंतरानिरू
पणात्।श्रुतौचनेवाएतेउल्मुकेउद्धहत्यनुयाजेभ्यइत्युल्मुकयोरेवनिरपेक्षसाधनता प्रतीतेश्च
या अनांतयामवाक्यात्।तयोरेवायातयामताप्रतीतेः।यातयामइववाएतदग्निर्भवतीत्यनेनाहव
नीयस्यप्रधानोद्देशेनप्रवृत्तानांसंस्काराणांयातयामत्वावगमाच्चोल्मुकयोःपरस्परंसमा रामः
सइत्याशंक्यसूत्रंव्याकरोति।समासइति।नन्वत्रप्रमाणमित्यतआह।तेपुनरिति।नचप्र ३४

ब्राह्मणवाक्यमेवप्रमाणयति तथाचेति।अत्रैकदेशिनापाठक्रमभंगेनसूत्रंव्याख्या
तंतद्दूषयितुमनुवदति अत्रकेचिदिति।ननुकिंबीजंसूत्रक्रमभंगेचइत्याक्षिपति।कु
तएत॰दिति।समाधत्तेएवमिति।अध्वर्योःसमिदाधानस्यदृष्टप्रयोजनानुपलब्धेः
प्रैषसमवेतादृष्टकल्पनेनप्रैषांगत्वमित्येकदेशिमतंदूषयितुमुपन्यस्तति।समिदा
दानमिति।नन्वस्यप्रैषांगत्वेप्रमाणंवाच्यमित्याशंक्य सन्निधानमेवप्रमाणमि
त्याह तदुत्तरेति।ननुसमिदादानस्याग्निसमिंधनंदृष्टमेव प्रयो जनमित्यतआह।
नचेति।तदेतद्दूषयति।तन्नेति।अर्थादिति।यथालोकेकूपखननादौप्रेर्यमाणःकुद्दा
क लादिसामग्रीदानपूर्वमेवप्रेर्यतेतद्वदित्यर्थः।समिदादानस्यदृष्टार्थतासाधनप्र यो रामः
जनमाह।एवंचेति।नन्वयातयामाग्निपदतऊर्ध्वमिसंस्थितेयज्ञस्येसनेनासंस्थि ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतियोग्यंतरानिरूपणं आहवनीयादिवत्पृथक्करणविधानेन तस्यैवप्रतियोगित्वेननिरूपणादुभयोरस्त्यतिक्रमेत्वाविशेषेणतयोः परस्परक्षेपाप्रतीतेश्च। तत्पुनराप्यायतीत्यनेनसजातीयप्रचयरूपाप्यायनविधानात्। अयातयामीकरोतीत्यत्रपुरुषव्यापारश्रवणादुल्मुकयोरयातयामत्वस्यैसिद्धत्वेनपुरुषव्यापारानुपपत्तेराहवनीयएवसमित्येकीभावेनप्रक्षेपंकृत्वेत्यर्थः। यः प्रैषद्वयमिति। लट्लोडुत्तममध्यमपुरुषोत्तमपुरुषांतत्वेनोभयोर्निराकांक्षत्वात्प्रैषद्वयमित्यर्थः। नन्वभयोर्निराकांक्षत्वेपिप्रयोजनैक्येनैकवाक्यतास्यादित्याशंक्यप्रयोजनभेदमाहतत्त्वेकइति। अतिथ्यादोसमिदपिनभवतीत्यर्थः। ननुसंमार्गप्रैषस्यौसंनिधानादनुयाजार्थत्वेनतदभावेर्थलोपादभावएवयुक्तइत्यतआहसंमार्गप्रैषस्त्विति। नन्वस्यसर्वार्थत्वेप्रमाणंमृग्यतइत्याशंक्य

स्वतः

पि

तकर्ममात्रांगत्वेनोल्मुकसमासविधानमित्यतआहउल्मुकसमासश्चेति अनुयाजेभ्यउदूहंतीत्यनेनोपक्रमगतेनानुयाजांगत्वेनविधानादसंस्थावाक्यस्यतदुपसंहारगतत्वेनानुवादादुर्बलमितिभावः। नन्वनुयाजयुक्तेनवाक्येनोदूहनमनुयाजांगत्वेनविनियुज्यते असंस्थावाक्येननुसंस्पर्शनमितिविषयभेदान्नबलाबलचिंतेतिचेन्नानुयाजवाक्यस्योदूहनरूपोल्मुकसंस्कारद्वारासमासस्यानुयाजार्थत्वावगमपरत्वादित्येकविषयत्वात्तदुक्ताबलाबलचिंतेतिदिक्। चोदनालिंगातिदेशेनावभृथेष्ट्यांप्रैषवाक्यस्यप्राप्तौयथाश्रुतेनाग्निप्रकाशकेनापांप्रकाशनासंभवात्प्रकृतिलिंगवचनानामूहेनप्रवृत्तिरित्याह। अग्निमग्नीदिति। ए॰ने। नन्वेषातेअग्नइतिमंत्रवाक्येनप्रधानतयाग्नेःप्रतिपादनादग्नेरेवेदमनुमंत्रणंस्यादित्यतआह। अनुमंत्रणंचेति। ननूक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंगादग्न्यर्थत्वमित्याशंक्य लिंगापेक्षया बलवतीं द्वितीयाश्रुतिं प्रमाणयति तां होतेति ॥
तथा च तामिति द्वितीयाश्रुत्या लिंगं बाध्यत इति भावः अपि च मंत्रस्यापि समित्प्रकाशक
त्वाच्छ्रुतिलिंगयोरविरोध इत्याह मंत्रलिंगाच्चेति । वरुणप्रघासइनिसमिद्वतस्य वचन
स्य समवेतत्वादित्याशयः । अग्नीनाः सं मिति । चोदकप्राप्ते मंत्रे वभृथेष्ट्यां प्रकृतिलिंग
वचनैर्यथाश्रुतैस्तत्समवेतार्थप्रकाशनसामर्थ्याभावादूहेन प्रवृत्तिरित्याह मंत्रस्य चे
ति । ब्रं ह्वानीयं ननु देवान् यजेति यजयजेत्युत्तराविति सूत्राभ्यामनुयाजत्रित्वस्य प्राप्ते
स्त्रिरित्यधिकमित्यस्वरसेनाहाथवेति । अनुयाजां नेस्वरूं जुहोतीति वाक्ये नुयाजपद
स्य प्रधानमानमात्रपरत्वमभिप्रेत्याशंकते यद्येवमिति । नन्वनुयाजपदस्य सांगानुया
जपरत्वमभिप्रेत्य समाधत्ते नैतदेवमिति औपभृतमिति । ननु जुह्वैव होमविधानात्त

राम·
३६

माख्यानाच्च सूत्रे समानीयेत्यधिकमिति चेन्नोपभृत्साज्यग्रहणस्यानुयाजांगतया वि
नियोगात्तु थैव होमो मा भूदिति समानीयेति । सूत्रे च रतिर्यागार्थस्तेन सर्वेषां यजतिधर्मा
णां प्राप्तिः । अ· जेति । ननु यजतिधर्मत्वेनैवातिक्रमणाश्रवणयोः प्राप्तत्वात्तद्ग्रहणं न कर्तव्यमि
त्यत आह । अतिक्रम्येति । अत्रोत्तरयोरनुयाजयोः किं देवतोद्देशविशिष्टः प्रैषः उत तद्रहित इति
संशये सूत्रेणैव पूर्वपक्षमाह । यं· तरो । द्वाविति । प्रथम एव देवानिति बहुवचनांतेन वचनात्स
र्वेषां देवतोद्देशस्य कृतत्वादित्याशयः । अत एव देवां यजेत्येवाहाध्वर्युरिति श्रुतिरपि प्रथम एव
नियमपरा नन्वस्मिन् पक्ष एवकारो नोपपद्यत इति चेन्न । एवकारस्य वाक्यविच्छेदपरत्वात् । अन्य
था देवं देवमिति सर्वत्र होतेत्यनेनैकवाक्यत्वं स्यात् । एवं प्राप्ते सिद्धांतसूत्रं दे· शेत । सूत्रं व्या
करोति । सर्वत्रेति । ननु कं प्रथमे बहुवचनांतेन सर्वेषां देवतोद्देशस्य कृतत्वान्नोत्तरयोर्देव

न
छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोद्देशेन प्रयोजनमित्याशयेनाक्षिपति। कुत एतदिति। सर्वत्र प्रैषे देवतोद्देशस्य न्यायप्राप्तत्वा
दित्याशयः। ननूक्तं प्रथमत एव बहुवचनांतदेवतोद्देशो नोपपद्यत इति चेन्न। बहुत्वस्यासंभवे
तत्वेनाविवक्षितत्वान्नियमशब्दादिति। ननूक्तमेवकारस्य वाक्यव्यवच्छेदकत्वात्प्रथम एवा
यं नियम इत्याशंक्य वाक्यव्यवच्छेदे प्रमाणाभावाद्देवान्देवानित्येवाहाध्वर्युः सर्वेष्विति वाक्या
न्वय इत्यभिप्रेत्य वाक्यमुदाहरति। देवानिति। तथा च सर्वत्र बहुवचनांतस्याध्वर्योरन्याय्य
त्वात्तदनेन विधीयत इत्यर्थः। ननु होतुरपि देवं देवमित्येकवचनांतदेवतोद्देशेनैव वाक्येन
विधीयते तथा चार्थद्वयविधानाद्वाक्यभेदप्रसंग इति चेन्न। तस्य मंत्रलिंगप्राप्तानुवादकत्वे
नाविधेयत्वात्। अत एव सर्वशब्दस्य देवं देवमित्यनेनान्वय इति निरस्तं। मंत्रलिंगादेकवच
नांतस्य देवतोद्देशस्य सर्वत्र प्राप्तत्वेन तदन्वये प्रकृतिविशेषकरत्वाभावात्। एवं ह्येवकारः स

राम॰
३७

मर्थितो भवतीति न पूर्वपक्ष इत्याह। अध्येति। वि॰ [सूत्र] नाद्य॥ वि[वृत्ति]दर्शनात्। महापितृयज्ञे चोदकप्रा
प्तप्रैषवाक्ये तत्र बर्हिषः प्रतिषेधेनानुयाजद्वित्वादूहेन द्वित्वादूहेन द्विवचनांतप्रयोगाप
त्ता बहुवचनांतप्रैषदर्शनं नोपपद्यते। अस्मिन्मते तूपपद्यत इत्याह विकृताविति। न बहु
वचनांतप्रैषविधायकं वचनमिति वाच्यं वाक्यस्यान्यपरत्वात्। तस्मात्सर्वत्र बहुवचनांत
देवतोद्देशनियमादर्थादन्यद्व्यवच्छिद्यत इति तात्पर्यार्थः। अथ व्यवच्छेद्यस्योत्तरयो
र्यजयजेत्यस्य कथं प्राप्तिरित्युच्यतां एवं श्रूयत इत्याद्युदाहृतवचनादिति चेन्नैवं व्यव
च्छेदो वचनप्राप्तत्वात्। अथ वचनस्यैवकारयुक्तवाक्यापेक्षया दुर्बलत्वेन बाधितत्वा
दिति चेन्न दुर्बलस्यापि व्यवच्छेदकवाक्यापेक्षितत्वेन बलीयस्त्वात्। अतो विकल्पं यु
क्त इत्याशयेन सूत्रार्थमुपसंहरतीति तेनेति। एवं सतीति विकल्पे सतीत्यर्थः। नन्विदं द

च
हि
एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्शनं नवचनं अतिक्रम्याश्राव्याध्वर्युरेवाहदेवान्यजेतियजयज्ञेति च तुर्थे चतुर्थेनुयाजेस
मानयमानोद्भूतिवाक्यस्य समानयनेविधिपरत्वादितिचेन्न। यजयजेत्यत्रैव वाक्यसमा
प्तत्वेन चतुर्थइत्यादि चरतइत्येतस्याभिन्नवाक्यत्वात्। ननु तथाप्यतिक्रम्येत्यस्यप्रति
प्रस्थातृनिवृत्तिपरत्वान्न प्रैषनियमविधायकत्वमिति चेन्न। यत्किंचिद्वाचाकर्तव्य
मध्वर्युरेव तत्करोतीत्यनेन प्रैषादिसकलवाक्व्यापारात्प्रतिप्रस्थातुर्निवृत्तेः प्राप्त
त्वात्। तस्मात्साधूक्तं वरुणप्रघासे पुनर्वचनं नियमार्थमिति। प्रैति। नुःसुच। ध्रु
वः। चवी। नन्वत्तममनुयाजं यजतीसनेनतृतीयस्यैवोत्तमत्वाभिधानेन चतुर्थस्या
नुयाजस्याभावाच्चतुर्थग्रहणं सूत्रेनुपपन्नमित्यत आह। चतुर्थग्रहणं चेति। च
तुर्थश्रुत्यैवानुयाजांगत्वबोधनादित्यर्थः। ननु तुल्येषु संख्यान्वयस्यो चितत्वादनु

म
राम·
३८

याजत्वमेवास्यमुक्तमितिचेन्न उत्तमश्रुत्यानुयाजांतरस्यबाधे न तदंगे संख्या
न्वयस्यन्याय्यत्वात्। ननु तथापि चतुर्थग्रहणमनर्थकं अनुयाजशेषप्रतिपत्ति
त्वेन तत्संनिधानाच्च तदंगत्वस्य सिद्धेरित्यस्वरसादाहोर्वेति। चतुर्ग्रहणमनुयाज
धर्मातिदेशार्थमित्यर्थः। नन्वेवं सकलानुयाजधर्मप्राप्तिः स्यादिति चेन्न। अथो
त्तममनुयाजमिष्ट्वासमासमानीय जुहोतीसनयाजुहोतिश्रुत्यान्येषां यजति
धर्माणांबाधात्। ननु मंत्रवत्त्स्वाहाकारः। सर्वत्रैसाम्नानादत्र मंत्राभावात्स्वा
हाकारोनप्राप्यत इत्यत आह। मंत्राभावेपीति। अ॰हीति। ननु सूत्रेप्रतिमंत्रग्रहणा
भावात्समस्तमेकमेवानुमंत्रणमावृत्याप्रत्यनुयाजं प्रवर्तत इत्यत आह। वाक्यभे
दादिति। त्रयाणामपिमंत्रवाक्यानां पूरणत्वेन परस्य निराकांक्षत्वादित्याशयः।

थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वप्रयाजानुमंत्रणवदिदमप्यनुमंत्रणं याजमानं स्यादित्यत आह नत्वेति। विकृतावनुयाजानां विवृद्धौ चतुरादिषु किमनुमंत्रणानां समविभाग उत स्वस्थानां स्येन धर्मसंबंध इति संदेहे सूत्रेणैव पूर्वपक्षमाह। एवं जेत। सूत्रं व्याचष्टे। एवमित्यादि। दंडकलितवदावृत्त्या विभागः मा भूदिति सं[?]मुच्यते। ननु पशावेकादशानुयाजके कथं समविभागः स्यादिति चेन्न। देवरक्षा एव किंशुका इति न्यायेन चतुर्थे भागे संख्याया न्यूनत्वं भविष्यतीति न किंचिदनुपपन्नं। ननु पुरुषार्थत्वादनुमंत्रणानां न विकृतौ प्रवृत्तिरित्यत आह।

म

शंक्या

अनुयाजेति। वानस्पत्यस्मात्विकृवदिति भावः। एवं प्राप्ते सिद्धांतसूत्रं स्व०थित्वात्। सूत्रं व्याकरोति। न चेति। ननु पक्षांतरस्यानुपपन्नत्वात्समविभागस्य एव युक्तत्वात्तदभावे नुमंत्रणमेव न स्यादित्याक्षिपति किं न हीति। द्वाःप्रभृतिमंत्राणां प्रथमानंतरं प्राग्द्वि

राम॰

३९

तीयाच्च पाठात्वानस्पत्यादिमंत्राणां नाराशंसानंतरं प्राक् स्विष्टकृतश्च पाठात्तयोर्धर्मप्राप्तिरित्याशयेनाह विकृतावितिति। ननु प्रथमधर्मसंबंध एव किं न स्यादित्यत आह। प्रथमेहीति। ननु सर्वत्र पूरणो प्रयाजाधिकरणन्यायेनात्याभ्यास एव युक्त इत्याशंक्य नेति॥ यद्यपीति। स्यादेवं यदि विशेषप्रमाणं न स्यादस्ति तु विशेष इत्याशयेन समाधत्ते तथापीति। अत्र वृद्धानां संमतिमाह। आह चेति श्लोकाः स्पष्टार्थाः। स्यादेवमधिकरणं यद्यनुमंत्रणौ विकृतौ प्रवृत्तिः स्यान्न त्वस्य तदस्ति पुरुषार्थत्वात्। विकृतिभावना हि साधुनफलयुक्तेति कर्तव्यतापेक्षमाणा वचनं नाम चोदनालिंगैश्च यत्प्रकृतौ क्रतुभावनैत्थंभावेन गृहीतं तदेव गृह्णाति नान्यत्। न चानुमंत्रणं क्रतुभावनया गृहीतं तस्य श्रुत्याभिचारार्थत्वेन विनियोगात् तस्माद्विषयाभावान्नेदमारंभणीयमित्याशयेनाधिकरणं

नां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूषयति अत्रोच्यत इत्यादिना। ननु पुरुषार्थत्वे पि स्वादिरत्वस्य प्रवृत्तिर्भविष्यतीत्यत इति शंक्य
ते। नचेति। खादिरस्य वाक्यांतरेण प्रवृत्तौ क्रत्वर्थतयापि विनियोगेन तदंशेन विकृतिभा
वनया ग्रहणस्योचितत्वादित्याशयेन समाधत्ते तत्रेहीति। तस्मादनुपपन्नमधिकरणं
वचनादनु मंत्रणानां विकृतौ प्रवृत्तिरिति पित्र्यभूतिः काम्यस्यापि गुणस्याश्रयप्रवृ
त्या विकृतौ प्र[illegible]वृ तिर्यस्त्वनाश्रितो गुणः स न प्रवर्तते यथाहार्यपुरिषां पशुकामस्ये
त्यादिरित्यन्ये विनियोजकप्रमाणाभावान्न्यायविरोधाच्चोभावप्यनुपपन्नौ नन्वेवं सूत्र
योः कागतिरित्यत आह तेनेति। विषयाभावेन प्रयोजनाभावात् त्वाचिंतया न्यायोपद
र्शनमात्रं सूत्राभ्यामाचार्यैः कृतमित्यर्थः। नन्विदमयुक्तं प्रयाजेषु न्यायस्य दर्शितत्वेन
नवीनन्यायोपदर्शनाभावात्। ननु तत्र सर्वत्रोत्तमेनेति न्यायोपदर्शनं दृहुनु खस्वस्त्रानां

ज
राम०
४०

त्येनेति विशेषदर्शनात्संगतार्थत्वमिति चेन्न न्यायप्रवर्तकस्योपायित्वस्योभयत्रापि
तुल्यत्वादित्यस्वरसाद्विषयांतरमाह धर्मांतरेति। ननु किं तद्धर्मांतरमित्यत आह स
चेति। प्रतीच्योजुहोतीत्युक्तत्वाद्धोमस्य स्थानमित्यर्थः। तथा च द्वारप्रभृतीनां नारा
शंसस्थाने होमः वानस्पत्यप्रभृतीनां स्विष्टकृत्स्थाने होम इति व्यवस्थापयितुमधिक
रणमित्याशयः। समाधानसौकर्यादाह यद्वेति। एस·तीची। नन्वेत्येतित्सूत्रे नुपपन्नं
यजतिस्थाने कर्मांतरस्याविहितत्वेनाध्वर्योरागमनस्यार्थप्राप्तत्वादित्याशंकते। एत्ये
ति। यजमानासनस्य सन्निहितत्वेन तत्रास्थितस्यैव यजमानस्य व्यूहनं स्यादिति त
न्माभूदित्येत्येत्युच्यत इत्याह तेनेति। प्रतिषेधेति एतदुपलक्षणं अर्थलोपाभावादित्य
पि द्रष्टव्यं। तस्मादनुपपन्नमेव जरूपभृद्ग्रहणमित्याह कस्तर्हीति। गुणसंबंधार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनर्ग्रहणमितिसमाधत्ते उच्यते इति। अग्नीषोमयोरित्यादिस्फुटार्थं॥ सूत्र यन्न त॥
एवं यथादेवं मूहतीति श्रुत्या सामान्यरूपेण प्रकृतौ मूहनं विहितं अग्नीषोमयोरि
त्यादिना तु विशेषरूपेण मूहनं विहितं। तेनैकदेवत्यस्याप्यग्नेः प्रकृतौ मूहनमुपदे
शत एव प्राप्यते। अन्यथा प्रकृतावुपदेशाभावेन तद्विकारे सौम्यादावुपदेशातिदे
शयोरभावादूहनप्रवृत्तिर्न स्यात्। तथा च सूत्रकारेणापि यथा श्रुत्यनुयायिना
सामान्यविधायकमेव सूत्रं कृतं तदेतद्व्याचष्टे प्रकृत्यर्थमेवेति। ननु विकृतावतिदे
शार्थमेवेदं किं न स्यादित्यत आह विकृताविति। नन्वेवमिंद्राग्न्योर्मूहनमिति सूत्रं व्य
र्थं स्यादित्याशंकते। नन्विति। समाधत्ते समाम्नायेति। ननूपांशुयाजाग्नीषोमयोर्या
गे आवृत्तिदर्शनादिहाप्यावृत्त्याभाव्यमित्यत आह उपांशुयाजेति गुणेति व्यूहनं मं

राम०
४१

त्रस्य यजुष्ट्वेनोपांशुत्वादावृत्तिप्रयोजकविरोधिगुणभेदाभावान्नावृत्तिरित्यर्थः। अ
सूत्र
ध्वर्युः तरेँ ननु प्रकृतावपूर्वत्वेनोहाभावाद्यथाम्नात एव मंत्रः स्यादित्याशंक्य श्रुतिसूत्रा

तुं

भ्यामेव मंत्राविशेषं विधाय सूत्रावयवमुत्थापयति तदेति। ननु दृष्टप्रयोजनानुपलब्धे
रदृष्टार्थमेवेदं स्रुग्व्यूहनमिति यावदुक्तो तावद्विलेनप्रवर्तत इत्यत आह व्यूहनस्ये
ति। तथा चेष्टदेवतासंकीर्तनेन स्रुवौ स्रुचौ व्यूहतीत्यनयाद्वितीयया श्रुत्या तदर्थतया
सूत्र
विनियोगाच्च नादृष्टार्थमित्यर्थः। अभ्युत्रँ नन्वभ्युक्षतिक्रियायाः कर्मानुपादानात्सू
त्रे न्यूनत्वमिति चेन्न। प्रकृतत्वेन स्रुचः कर्मत्वेन प्राप्तत्वात्। नन्वेवं द्वयोः स्रुचोः प्रा
प्तिः स्यादित्यत आह। अभ्युक्षणमि ति। कार्येति। न भूतकार्याभिसंबंधो हेतुः किं तु क
रिष्यमाणां जनकूपकार्यसंबंधः। भूतसंबंधापेक्षया तस्य बलीयस्त्वादित्याशयः। न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुजुह्वोरसद्रव्यत्वाद्द्रवद्रव्यसाध्यांजननंतयानकर्तुंशक्यतइत्यत आह जुह्वेतीति।
तथा च जुहूपदंलक्षणयातत्संसृष्टद्रव्यपरमित्यर्थः। परिधानक्रमेणेव संस्कारा
णांप्रवृत्तिरितिन्यायंज्ञापयितुंयथापूर्वमित्याह यथापूर्वमितीति। नन्वेवमस्यसूत्रा
वयवस्यन्यायप्राप्तानुवादकत्वेनवैयर्थ्यंस्यादित्यस्वरसादाह। अथवेति। अत्रैकदे
शिमतंदूषयितुमुपन्यस्यति। अत्रेति। चतुर्थ्यास्तादर्थ्यवार्थः संप्रदानंवोभयथाव
स्वादीनां देवतात्वमंतरेणचतुर्थ्यनुपपत्तेस्तेषांदेवतात्वंतयावगम्यतइत्यर्थः। तदे
तद्दूषयति। तदयुक्तमिति। परार्थत्वात्परिधिस्तुत्यर्थत्वादित्यर्थः। परार्थत्वमेववि
वृणोति। नात्रेति। प्रकृतीति। ननुपरिधिग्रहणस्यपरिधिसंस्कारार्थत्वात्संस्काराणां
चप्रवृत्तिक्रमेणानुष्ठानक्रमनियमात्प्रथमग्रहणंप्राप्तमित्यत आह। प्रथमेति। प

रिधिग्रहणस्याश्रवणार्थत्वेनपरिधिसंस्कारकत्वाभावादित्यनुपदंवक्ष्यति। तथाचय स्य
कस्यचिद्ग्रहणेनापिकार्यसिद्धेर्नप्रथमग्रहणंनियमेनप्राप्तमित्याशयः। एतदेवव्यतिरेक
मुखेनाह। अन्यथेति। अत्र परिधिग्रहणंपरिधिसंस्कारार्थमुतसूक्तवाकप्रेषणक्रि
योपग्रहार्थमितिसंदेहेपूर्वपक्षमाह। परिधिग्रहणंचेति। परिधिमाभिपद्येत्यत्रपरिधि
मितिद्वितीयाश्रुत्याभिपदंतस्यपरिध्यर्थतावगम्यतइत्याह। ग्रहणेति। ननुयथेध्म
सन्नहनान्येवाभिपद्याश्रावयतीत्यत्रसन्नहनानामभिपदनक्रियाकर्मभावेपिहोतृ
वरणार्थत्वमेवतथेदंपरिधिकर्मकमपिसूक्तवाकप्रेषणक्रियोपग्रहणार्थंभविष्यती
तिचेन्न। परिधीनांचरितार्थत्वेनतत्संस्कारस्यानपेक्षितत्वात्। अथसन्नहनान्यु
पिचरितार्थानि। तत्संस्कारस्यादित्यस्वरसेनचपरिधिम्योह्येतदाश्रावयतीत्यने

नवाक्येनाश्रावणस्यापरि ध्यर्थत्वावगमादालंभस्यापितादर्थ्यमित्याह। तेति। मंत्रलिं
गादप्याश्रावणस्य परिध्यर्थत्वमित्याह तथेति। अत्र तदागमाधिकरणन्यायेन सिद्धांत
माह। सूक्तवाकेति। ननूक्तं वाक्यादाश्राव णं परिध्यर्थमित्याशंक्य मंत्रलिंगेन वाक्यं बाध्य
त इत्याह लिंगाच्चेति। न चश्रुत्या परिध्यर्थत्वं परिधीनामिध्मसन्नहनवदग्नेर्विनियो
गाभावादित्यास्तं। पं॰ ष्येति। सं॰ दानं। वि॰ येति। ननु स्थानशब्दस्योत्पत्तिस्थानवाचक
त्वाद्व्रीहियवयोः करणमित्याशंक्य स्यादेवं यदि स्थानशब्देनोत्पत्तिरुच्येत न चैवमुच्य
ते किं तर्हि प्रतिपत्तिस्थानमित्याह। विधत्योरिति। अयं॰ स्यां। ननु तत्तदर्थेषूपयुक्तानां
माज्यानां प्रतिपत्तिमिच्छमानानां प्रस्तरांजने प्रतिपत्तिर्विधीयत इत्यत आह। प्रस्तरे
ति। एनामिति द्वितीयाश्रुत्यांजनस्य तादर्थ्येन वियोगात्प्रतिपत्तेश्च संस्त्रवाहुतौ विधाना

इ

राम॰

४३

दितिभावः। एतद्विचारस्य प्रयोजनमाह। तथाचेति। प्रकृतौ नाशदोषादौ विकृता
वननुयाजके चेति भावः। म॰ रति। सूत्रे नुशब्दात्सूक्तवाकादन्वितिगम्यते। हं॰ ति।
य॰ षिति। कारकाणां क्रियाश्रयमंतरेण विधानानुपपत्तेरत्र हस्तमात्रस्य विधा
ने मंत्रोपदेशानुपपत्तेरिहैव होमो विधीय इत्यत आह। तच्चेति। हस्तलक्षणगु
णपरत्वादित्यर्थः। क्ष॰ नित्यं। नित्यमेवेति। प्रोषितेपीत्यर्थः। यजमानभागहोमे गुणां
तरं विधीयते। सू॰ अहं त्वं सदस्मीति सूक्त॰ ते। ननु सूक्तवाकांत इति सूत्रे साकांक्षं
कुत्र संबध्यत इत्यत आह सूक्तवाकांत इत्यस्येति। व्यवहितस्यापि बुद्ध्या विपरिवृत्ते
रन्य त्रदर्शनादिति भावः। अत्राधिकरणं रचयितुं विषयवाक्यमाह। शार्वेहीति॥
विचारांगसंशयमाह। तत्रैतदिति। ननु पदलोहो ता न्वाह सूक्तेवनदा हेति तद्वा एत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञस्याशिषमाशास्त इत्याभ्यां वाक्याभ्यां सूक्ताशिषयोरन्तरस्य फलत्वेनावगमात्
कथमंगांगीलक्षणः संयोग इत्याक्षिपति कुत एतदिति। तृतीयाश्रुत्या सूक्तवाकस्य प्र-
स्तरप्रहरणं प्रति शेषत्वेन विनियोगादुक्तवाक्ययोरर्थवादप्रायत्वमित्याशयेन समाधत्ते
सूक्तवाकेनेतीति। ननु सूक्तवाकप्रस्तरयोरुभयोर्निर्ज्ञातप्रयोजनत्वान्न तृतीयालक्ष
णया कालार्थसंयोगेनाप्युपपत्तेर्नांगांगिलक्षणः संयोग इत्यत आह सूक्तवाक एव या
ज्येति। आमनंति आचार्या जैमिनिपितृभूतिप्रभृतय इति शेषः। नन्वस्तु प्रस्तरस्येइ
मत्त्वं तथापि देवताया अभावान्न प्रहरते र्यागार्थत्वमित्याशंक्य सूक्तवाकप्रकाश्या
नामग्न्यादीनां देवतात्वमित्याह। अग्न्यादिदेवताकश्चेति। ननु तत्प्रतीयमानदेवतासंब
धानवगमान्न यागत्वमित्यत आह। स्पष्टतरं चेति। पूर्वपक्षमुपसंहरति तेनेति। एत

राम·
४४

दूषयति तदेतदिति। दर्शपूर्णमासाभ्यामिष्ट्वान्येन यजेतेतिवत्प्रस्तरसूक्तवाकयोर्नि-
र्ज्ञातप्रयोजनत्वान्नांगप्रयोजनसंबंध इत्याहोभयोरिति। ननु प्रस्तरस्य प्रयोजनांतरे
विधानाभावान्न निर्ज्ञातप्रयोजनत्वमित्यत आह। प्रस्तरस्य हीति। ननूक्तं सूक्तवाकस्य
सूक्तियजमानाशिषयोर्न्न फलत्वमित्याशंक्येष्टदेवतासंकीर्तनरूपफलत्वेन निर्ज्ञा
तप्रयोजनत्वमित्याह। सूक्तवाकस्य चेति। कालार्थसंयोगत्वं निगमयति। अत इति। न
नु तृतीयाश्रुत्या निर्ज्ञातप्रयोजनस्यापि सूक्तवाकस्य प्रहरणांगतावगम्यत इत्याशं
क्य तृतीयायाः कालक्षार्थत्वमाह। तदं त इति। ननु सूक्तवाके याज्याशब्दप्रयोगाद्या
ज्यायां याज्याशब्दाप्रयोगस्य न धर्मातिदेशार्थत्वाद्यागसाधनत्वमतिदिश्यत इत्या
शंक्यास्यार्थवादत्वेनोपपत्तिमाह। सूक्तवाके ति। एवमेवेति कालार्थत्वेपि स्तुत्यर्थमु

एवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पपद्यत इत्यर्थः। ननु सूक्तवाकेनाग्न्यादिप्रकाशनात्तद्देवताको याग एवं व कुतमुचित इ
त्यत आह यज्ञेति। ननु कर्मनिर्वृत्त्युत्तरकाले देवताकीर्तने प्रयोजनांतराभावाद्यागार्थत्वमे
व युक्तमित्यत आह कर्मेति। स्तुतिमात्रमिति। अंगे फलश्रवणस्यार्थवादत्वमिति न्या
यसिद्धत्वादित्यर्थः। ननु वाक्यादवगतस्य फलस्यार्थवादत्वकल्पनमनुचितमित्यत आ
ह। नहीति। ननु वाक्यानवगतावपि मंत्रवर्णादवगम्यत इत्यत्त आह न च मंत्र इति। ननु
बृहस्पतिसवेनेष्ट्वा वाजपेयेन यजेतेत्यत्र फलवतोपि बृहस्पतिसवस्य फलवद्वाजपे
यांगत्वं दृष्टमित्यत आह वचनमंतरेणेति। यद्वाननुफलवतोपि स्वादिरस्य फलवत्क्र
त्वंगता दृष्टेत्यत आह वचनमंतरेणेति। अत एव प्रस्तरस्य प्रक्षेपमात्रं तत्साङ्गोयजमा
नस्येत्साशयेनोपसंहरति। तस्मादिति। एतदेवाग्नीषोमीयस्येत्यनेनातिथ्याप्रस्तरस्या

न्यसाधारण्येन वियोगात्तत्र प्रहरणबाधेपि न सूक्तवाकस्य बाध इति सिद्धांतस्य प्र
योजनमाह प्रयोजनमित्यादिना। अं सुत्र रेति। पूर्वोक्तन्यायेनाग्नीध्रः प्राप्तत्वात्सूत्रे तद्ग्र
णमाक्षिपति अग्नीद्वचनमिति। एकदेशिमते समाधानमाह। तत्रेति। परिणामस्य
न्यायप्राप्तत्वात्कथमपि परिणाम इत्याक्षिपति कथमिति। तत्र वाचनिक एवा विप
रिणाम इत्याशयेन समाधत्ते वचनादिति। तत्राप्यग्नीदाहानुप्रहरेत्यस्य प्रकृति
प्राप्तानुवादकत्वेन वचनत्वाभावान्न न्यायप्राप्त विपरिणामबाधकत्वमित्येकदेशिम
तं दूषयति नदेतदिति। तर्हि किमर्थमग्नीद्ग्रहणमित्यत आह अत इति। ननु तर्हि
श्रुत्यनुकरणेन कांश्चिदानर्थक्यपरिहारः कृत इत्यस्वरसादाह अथवेति। अन्य
त्रेति। हविर्यज्ञ इत्यर्थः। यत्र क्रतुष्वयं तत्रेति यावत्। ज्योतिष्टोम इत्युपलक्षणं प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शावपि द्रष्टव्ये।अत्रापृद्धसंमतिमाह।वाहेति।सूत्र॰भते।नैसचेति।प्रासस्तृणमित्य

नेनवाक्येनालंभस्य तृणप्राशनांगत्वेन विनियोगात्तदभावआतिथ्यादौनभवती

त्यर्थः।वाक्यशेषमंत्रलिंगाभ्यामात्मालंभस्याग्नेरात्मरक्षणार्थत्वप्रतीतेः तस्य

चभावि प्रयोजनस्यैवन्याय्यत्वान्न तृणप्रासनांगत्वमितिवाक्यशेषोदाहरणपूर्व

कमाह तेनो अपीति।प्रवृणक्तिरक्षतिइदमुपलक्षणंचक्षुर्मेपाहीतिमंत्रलिंगाद

पिद्रष्टव्यं।सूत्र॰संव॰श्रुतः।अत्रव्यत्यासमितिसूत्रकारेणोक्तं तत्कथंव्यत्यास इत्याशंक्य

यथालिंगं [illegible] व्यत्यास माह संवदस्वेत्येवमादीनामिति।नैवमध्वर्युश्चाग्नीध्र

देवलोकंयजमानमपिनयतइत्यनेनवाक्येन यजमानस्यदेवलोकगमनानुकू

लादृष्टार्थत्वंसंवादस्यप्रतीयत इत्यतआह।तस्यचेति।अयंभावः।प्रैषस्यतावद

न

राम॰

४८

संदिग्धंशंयोर्वकार्थत्वंआश्रावणप्रत्याश्रावणयोस्तुप्रैषार्थत्वमन्यत्रदर्शनात्।तस्माद

र्थ्यादितरयोरपितादर्थ्यंएवंप्रथमस्यलिंगात्सर्वार्थत्वं।यत्तूक्तंयजमानस्यदेवलोकगम

नंतदर्थवादप्रायंतस्मात्साधूक्तं।तस्यशंयोर्वाकार्थत्वादिति।ननुशंयोर्वाकस्यशंयुर्हवबार्ह

स्पत्योजसायज्ञस्येत्युपक्रम्यनांयज्ञस्यसंस्थामपयेतियांशंयुबार्हस्पत्योवेदछं योराहेति

वाक्येनयज्ञसमाप्त्यर्थत्वावगमाद्यावदुक्तां तापछिन्नयोरपिप्रवृत्तिरित्याशंक्यामाह।

शंयोर्वाकश्चेतितन्नदं तर्हिं तेमनुष्येभ्यआसेतिवाक्यपर्यालोचनयादृष्टद्वाराकर्मसमा

प्त्यर्थत्वाद् दृष्टार्थत्वंशंयोर्वाकस्यततोयावदुक्तादौनप्रवृत्तिरितिभावः।परिसूत्रमि॰।तिं॰।य

थाप्रस्तरस्यप्रहरत्युपदेशात्प्रतिपत्तित्वंतुथापरिधीनामप्यनुप्रहरत्युपदेशात्प्रतिपत्ति

त्वमेवेत्यभिप्रेत्याह।प्रतिपत्तिरिति।सूत्र॰चौ॰होति।ननुसंप्रहातिसंस्त्रवभागास्थेया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बृहं तद्इति वाक्येन मंत्रस्य प्रग्रहणार्थत्वेन श्रुतौ विनियोगानादर्थ्यामि त्येकदेशिमतमाह। प्रग्रहणइति। लिंगेन वाक्यबाधाद्धोमार्थत्व मेव युक्तमित्याशयेन स्वमतमाह। होमे वेति वा क्यशेषाद्पि होमार्थत्वमित्याह। लिंगाच्चेति। ननु श्रुतौ ग्रहणस्यैव विधानात्तत्रैव मंत्रान्वय इत्याशंक्य समाधत्ते। यत्पुनरिति। ससंप्रगृह्णातीत्यत्र संप्रग्रहणग्रहणं होमोपलक्षणार्थमि त्यर्थः। नन्वस्य किं प्रतिपत्तिकर्मत्वमुतार्थकर्मत्वं नाद्यः त्यागानुपपत्तेः। न द्वितीयः परप्रयुक्ता तुनिष्पादिसंस्त्रवसाधनकत्वादित्यत आह। प्रतिपत्त्यर्थकर्मवेति। स्विष्टकृद्यागवदित्यर्थः। उ भयार्थत्वसाधनप्रयोजनमाह। ततश्चेति। एवं यत्र यत्र प्रतिपत्त्यर्थकर्मत्वं भाष्यकारेणोच्य ते तत्रानेन न्यायेन बोध्यं। अस्य च न पुरोडाशयागशेषसाधनकत्वं तस्यासंसर्गिद्रव्यत्वे नसंस्त्रवाभावात्। किं त्वाज्यसाधनकयागशेषसाधनकत्वं। एवं चेत्सन्निधानादनुयाज

४७

ततश्चेति

यागशेषप्रतिपत्तेः स्यादित्यत आह। अविशेषाच्चेति। प्रयोजनमाह। सर्वत्रांतापच्छिन्नेया वदुक्तदर्वि होमाद्यावित्यर्थः। ननु देवताया अभावान्नायं याग इत्यत आह विश्वेदेवाश्चेति ॥ ननु मंत्रलिंगाद्विश्वेषामेव देवतात्वं न विश्वेषां देवानामित्यत आह वाक्यशेषाच्चेति। त थाच मंत्रोपि भीमाद्यभिधानवदेकदेशाभिधानद्वारा समस्ताभिधानपर इत्याशयः। नन्व वचने जुह्वाः परिभाषितत्वात्तया समानीय होमः स्यादित्याशंक्य वचनाद्वाभ्यां होम इत्या ह अथेति। घृतं सुत्र ग्रहणं न निर्देकं धुरि निधानं दृष्टाभावाददृष्टार्थमित्यत आह चरितार्थ त्वादिति। स्रुचोः संस्कार इत्यर्थः। ननु चरितार्थत्वाविशेषादनसः संस्कारः किं न स्याच्चेदिति चेन्न। तत्कार्यस्य व्यवहितत्वेन तत्र बुद्धिविपरिवृत्तेरभावात्। अतस्तु स्रुक्संस्कारत्वाद्या वदुक्तांतापच्छिन्नयोरपि प्रवृत्तिरित्याह। अतश्चेति। अत्र गतं धुर्याविति पदं मुख्यधुर्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिवर्द्दाभिधानपरमुतगौणधुर्ययजमानाभिधानपरमितिसंदेहे एकदेशिमतमाह अ
यंधुर्यशब्द इति। एतन्मतेप्रयोजनमाह। एवंचेति। प्रक्रांतेवचनस्यसमवेतत्वेसतीत्यर्थः
पिव्यज्ञइति। तत्रप्रतिषेधेनपत्नीबाधाद्यथाश्रुतेनमंत्रेणयजमानमात्रस्यप्रकाशयि
तुमशक्यत्वाद्वचनोहेनप्रवर्त्तनइत्यर्थः। तदेतद्धुर्यशब्दस्यानुद्रुह्यवयवार्थस्यसत्वेनमुख्य
त्वात्तत्परित्यागेकारणाभावात्तत्परत्वमेवयुक्त मित्याशयेनदूषयति। संप्रदायेत्विति। न
न्वत्रसामवायिकांगयुक्तस्यैवानसोविधानान्नानडुहोरिहप्राप्तिरित्याशंकते। यद्यपीति
कादाचित्कानडुत्संबंधमादायसमाधत्ते। तथापीति। सर्वे चेतु। यं०ते। नन्विदंवेधालभनंस्फो
ट्यप्रहारवददृष्टार्थंविधीयतइत्यतआह। संचार्यमिति। वेदिमिति द्वितीयाश्रुत्यावेद्यर्थत्वे
नविनियोगाद्वेदिसंस्कारइत्यर्थः। ननुनेदंवेदिसंस्कारविधानंतस्यानिःप्रयोजनत्वात्स

राम.
५८

र्वेषामाहवनीययागानांवृत्तत्वात्। अथसर्वत्रशंयोराहतदभिमृशतीत्यनारभ्याधीत
मित्यतआह। समिष्टयजुरिति। नन्वस्तुसमिष्टयजुरर्थः। तदनंतरंतत्रतस्यैवानुष्ठानात्
॥तथापिशंयोर्वाकसहयोगितयातदभावे आतिथ्यादावस्याभावोयुक्तियुक्तइत्येकंमतं
दूषयन्प्रयोजनमाह ततश्चेति। शेषिणामेवस्वशेषप्रयोजकत्वात्प्रयोजकत्वाभावेप्रयो
ज्याभावोयुक्तोनतुसहयोगिनोभावेसयत्रेतिवाक्यस्यानारभ्याधीतवेद्यालंभनस्यप्रक
रणसंबंधमात्रबोधनपरत्वमित्याशयः। वैः शंयः। वे०त्वंति। सूत्रेपत्नीसंयाज्यपदंपत्नी
संयाजापत्नीसंयाजसमुदायेलिंगसमवायन्यायेनप्रयुक्तमितिज्ञेयं। ननुसूत्रेगार्हपत्य
ग्रहणमनुपपन्नंश्रुतौतस्याविधानादित्याशंक्यश्रुतावर्थप्राप्तत्वान्नानुपपन्नमित्याशंक्य
गार्हपत्यदर्शनादित्यर्थशतपथवाक्यंपठंतितेप्रतिपरायंतीति। ननुप्रतिपरायनंदक्षि

दे.श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ गार्हपत्यस्य पूर्वदक्षिणेन २

आह

णाग्नावपि स्यादित्यत उक्तं विकृतावितिननु स्रुक्स्रुवयोर्ग्रहणस्यार्थप्राप्तत्वान्नतत्सूत्रणीय
मित्यत आह स्रुक् स्रुवग्रहणमिति। ननु प्राप्त्यभावान्नतद्व्युदासउचितइत्यत आहनु
पभरणेति। अंध्वं केषांहोत्राग्नीध्रयोरपि गार्हपत्येगमनविधानात्तयोरपि गार्हपत्य
दक्षिणाग्न्योरंतराले गमनंमाभूदिति सूत्रे ध्वर्युग्रहणं अथवा सर्वेसंचराः सर्वेषां
विकल्पेन यथासंख्ये नव्यवस्थया वा मा भूदित्यध्वर्युग्रहणं। पूर्वापरशब्दयोः प्र
तियोग्यताभिधायकत्वात्किं पूर्वेणकिमपरेणेतिजिज्ञासायां सूत्रं पूरयन्व्याचष्टे पूर्वे
णवेति। यदा गार्हपत्यमपरेण यजमानस्थानं गच्छतितदानेऽत्रे तेउपविष्टा पत्नी कथं म
तिक्रमणीयेत्यत आह तत्रापीति। अर्थादपरेषां वा यत इत्याह वात्यतो वेति। ऊंवा च यज
तित्वेन तत्सर्वधर्मप्राप्तावुपवेशनदक्षिणजान्वाचनरूपं द्वयविधानपरमिदं सूत्रं। तथा

१ धर्म

राम०
४९

च प्रत्याम्नायेन तिष्ठति क्रिया बाध्यते। ननु साकांक्षमिदं सूत्रमित्याशंक्याग्रिमसूत्रोपा
त्तया क्रियया संबंध इत्याह सोमादि त्रिति। ननु संनिधानात्सोमयागएवेदं धर्मद्वयवि
धानं स्यादित्याशंक्य पत्नीसंयाजावांतरप्रकरणेन संनिधान [illegible] बाधात्सर्वपत्नीसं
याजार्थतानन्वेवं सत्येवं सर्वेत्रेति सूत्रमनुपपन्नं स्यादित्यत आह अधिकारमिति। एं
मेषु तथा च वाक्ये नावांतरप्रकरणमाह प्रकरणानादरेण श्रुतौ स्मृतौ वा यत्र यत्रोपवि
ष्टहोमविधानं तत्र सर्वत्र दक्षिणजान्वाचनं विधीयत इत्यर्थः। ननु न विघ्नः किं जान्वाचन
शब्दाभिधेयमित्यत आह। जान्वाचनं चेति। नन्वाचारस्य मूलानुपलब्धेर्निर्मूलत्वं स्या
दित्यत आह लिंगाच्चेति। ऊंरं ति। अवांतरप्रकरणेन पत्नीसंयाजार्थमुपांशुत्वं विधीयत इ
त्याह पत्नीसंयाजैरितीति। ननु काम्येष्टिषु पांशुवदिहापि देवतामात्रस्यैवोपांशुत्वं स्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिचेन्न। चरणशब्दोपादानात्सर्वमिहोपांशु। ननु कथं चरणशब्दोपादाने सर्वमुपांशुरि
त्याशंकायां न्यायसूत्रमवतारयति। अधिकारमिति। च॰ न्यैवं यथा पितृयज्ञे नोपांशुच
रंतीत्यत्र तृतीयया निर्देशात्तत्करणिकार्याभावनाया मुपांशुत्वं विधीयते तथा चतदं
गेष्वप्युपांशुत्वविधानमुपपद्यते तथेहापि पत्नीसंयाजैरुपांशु चरंतीति तृतीयानिर्देशा
त्सर्वमुपांशु। यत्र तु न तृतीयानिर्देशो नास्ति यथाग्रयणे वैश्वदेवद्वत्यादौ तत्र देवतामात्रस्यो
पांशुत्वमित्यभिप्रायेण सूत्रं व्याकरोति। मंत्रेति। यज॰ मिति। यजतिपदोपादानाच्चतुरवत्त
त्वपुरोनुवाक्यादीनां यजतिधर्माणां प्रवृत्तिर्बोध्या न नु सूत्रे द्रव्यानुपादानात्कथमेते यागाः
स्युरित्यत आह स्थाल्येनेति। नन्वेषामाज्यद्रव्यत्वे किं प्रमाणमित्याशंक्य श्रुतिवाक्यं प्रमा
णत्वेनावतारयति। चतस्र इति। स्थाल्यं तु प्रकृतत्वादेव प्राप्यत इति ध्येयं। तृ॰ नी॰ स्तात् पं॰

रामः ५०

२कत्वाभावा

युं। यः कश्चिदिति। ऋत्विगंतर इत्यर्थः। तेषां परिक्रीतत्वात्। शं॰ वा। इडा शंयोर्वा कयोरतिदेशा
प्राप्तत्वेनांगांतरबाधेन तयोरपूर्वविधानमिति तत्वं। नान्विडांतं वेत्यनुपपन्नं तस्मादिडांत
मेव स्यादित्यनेनेडाया अपाक्षिकत्वेनोपसंहारादित्याशंक्यत्वा शब्दस्य क्रमभंगत्वाशं
शंय्वंतेन समं संबंध इति व्याख्यातुमाह नचात्रेति। सूत्रक्रमभंगे किं कारणमित्याक्षिपति
तत एतदिति। शंयोर्वाकविधायक एव विकल्पो नेडाविधायक इति समाधत्ते यत इत्यादि ना
॥ तस्मादिडाभवत्येव शंय्वंतं वा भवतीति सूत्रार्थः। शं॰ त्यां इडांत पक्षे तृणां जनादिमाभू
दिति शंय्वंतग्रहणं। यथासंख्यलक्षणेनाग्रादीनां स्रुगादिषु जनमित्याशये न सूत्रं व्या
चष्टे। शंय्वंत इत्यादि। ननु मंत्रोपदेशाभावात्कृष्णमेवेदं विधानं स्यादित्यत आह वत्सुपदे
शादिति। अ॰ रेति। प्रा॰ वत्। शं॰ वेति। शंय्वंतपक्षे पीडानिगदानंतरमदब्धाहुतिर्माभूदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क्रमार्थस्सूत्रे पुनःशंसंतग्रहणं।नन्वाहवनीये जुहोतीतिवाक्येन सर्वहोमांगतयाहवनी
येहोमा इतिपरिभाषणाच्चायमपिहोमः।आहवनीयएवयुक्त इत्यत आह अधिकारादि
ति।गार्हपत्यस्यपत्नीसंयाजेधिकृतत्वात्तदंगेपिसएवयुक्तः।अंगानामसति विशेषेप्रधा
नसादेश्यत्वस्यन्यायप्राप्तत्वात्।तदंगत्वंचतत्संनिधानात्तद्वेषस्यप्रतिपाद्यत्वात् चेत्या
शयः।पशौचोदनालिंगातिदेशेनदर्शपूर्णमासधर्मप्राप्तौतत्रपत्नीसंयाजानामपिप्राप्तेस्त
दंगतयादर्व्याहुतेरपिप्रसक्तौतत्रपत्नीसंयाजेजाघन्यापत्नीःसंयाजयंतीतिवाक्येनजा
घनीरूपद्रव्यांतरविधानात्तस्याप्रांसत्वेनासंसर्गिद्रव्यत्वात्संसर्गभावेनप्रतिपाद्याभा
वादर्थलोपादर्व्याहुतेरभाव इत्याह नचेति।केचित्तुतत्राज्यसंसर्गभावेनार्थलोपात्त्व
ग्गांजनाभावेशंग्रंततायाअप्यभाव इत्याहुस्तच्चिंत्यं।तत्रतावदाज्यसंसर्गस्यसंभवात्॥

तदभावेपित्वग्गांजनरूपसंस्कारकर्माक्षिप्त्याज्यांतरोपादानस्यापिन्यायसिद्धत्वात्।सं[सूत्र]तिच॥
ननुश्रुतौसव्यावर्तनविधानात्सव्येनाहत्येतिसूत्रमनुपपन्नमित्यतआह।सव्यावर्तनेति
अत्रसंचराणांपत्नीसंयाजरूपप्रधानार्थतयाविधानात्तन्निवृत्त्यावतीत्यनिःक्रमणमित्ये
कदेशिमतंदूषयितुमुद्भावयति।तत्रापीति।तदेतद्दूषयति।तदयुक्तमिति।नु[...]होति॥
नन्वाहवनीयेअयंहोमःस्यादित्यतआह।अधिकारादिति।पिष्टलोपेतीनन्वेतदुभ
यमप्यनुपपन्नंप्रतिपत्तौसर्वत्रद्रव्यस्यसाध्यत्वेनसाधनत्वाभावान्नवास्यार्थकर्मत्व
माशंकनीयंप्रतिपत्तिरेवेतिस्वाभिधानविरोधादितिचेन्न।प्रथमंसर्वत्रद्रव्यदेवत
योःसाधनत्वेनान्वयादन्यथातदभावेयोगस्यैवानिष्पत्तेः।पश्चा[...]ध्या[...]पेक्षायां
कृतप्रयोजनस्यद्रव्यस्यप्रतिपत्तिमिच्छमानस्यतत्संस्कारएवप्रयोजनमवसीयते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

यथापशुपुरोडाशयागे देवतायाः। तस्मात्साधूक्तं पिष्टलेपसाधनत्वादित्यादि। अत्र हस्तपात्री
लिप्तस्य पिष्टलेपस्यास्योदकदाने विनियोगात्। उलूखलादिषु विद्यमानस्यापि ग्रहीतुमशक्य
त्वात्कणवत्स्थापनाविधानाच्च देवतोद्देशेन गृहीतस्यान्यत्र गमनस्यानुचितत्वात्तदनुपपत्तये
विप्रुड्ढोमपदाज्यसाधनकं होमान्तरमेव विधीयत इत्येकदेशिमतं दूषयितुमुद्भावयति। यद्वे
ति। उत्तरत्र पिष्टलेपप्रतिविधिदर्शनात्पात्र्यंगुलिलग्नस्यैव ग्रहीतुं योग्यस्यावस्थापनं कर्त
व्यमिति कल्प्यते। यत्तु तत्रैवलग्नमिति सूक्ष्मं ग्रहणयोग्यं तत्प्रक्षालनमात्रोदकदाने विनियु
ज्यते। तथा च पिष्टलेपान्मितिसंगतं भवति। अन्यथा पिष्टलेपपक्षे लक्षणाप्रसज्येत। इत्याश
येनैकदेशिमतं दूषयति। तदपीति। नन्वस्य होमस्य प्रतिपत्तित्वेन यागाभावान्न देवताचिं
तात्र युक्तेत्यत आह। प्रतिपाद्यमानेपीति। ननु देवतोद्देशेन द्रव्यत्यागोपयोग इति यागल

५२

क्षणं। तत्तद्देवतया भवितव्यं। ननु होम इत्याशंक्य होमस्यापि यागघटितत्वेनात्राप्यव
श्यं देवतान्वय इत्याशयेन होमशब्दार्थमाह। देवतोद्देशेनेति। देवतोद्देशेन सक्तस्य द्र
व्यस्यावघातादिवत्प्रक्षेपरूपसंस्कारो विधीयत इत्यर्थः। तथा चात्र तत्र देवतया भवित वश्यं
व्यमित्याशयः। ननु माभूत्तांतद्धितचतुर्थ्यौ मंत्रलिंगात्तु देवतान्वयो भविष्यतीत्यत
आह मंत्रोपीति। ननूलूखलादीनां मंत्राभिहितत्वेन देवतात्वं स्यादित्यत आह उलू
खलादीनां चेति। तथा च मंत्रेण यद्विशेष्यतयाभिधीयते तस्य यागे देवतात्वेनान्वय
इत्याशयेन मंत्रवाक्यार्थमाह यदूखलादिष्विति ननु कामानां देवतात्वं भविष्यतीत्य
त आह। कामानामपीति। एवं चास्य होमत्वमेवानुपपन्नमिति पूर्वपक्षं निगमयति ए
वं चेति। एवं चेद्यागविधानान्यथानुपपत्त्या प्राकृतिकीकाचिद्देवता कल्पतामिति सि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्धांतं वक्तुं भूमिकामाह। अनिर्दिष्टदेवतेति। तत्रा विशेषेणप्राकृतवैकृतयोर्विकल्पे नयाकाचित्कल्पतामित्याशंक्य विशेषमाह तत्रेति संदेहे। काग्नाख्या कानग्राख्येतिसं देह इत्यर्थः। नन्वियं कल्पनानसांप्रदायिकीत्याशंक्यात्रवृद्धानां संमतिमाह। तथा चेति। नन्वेवमपि प्राकरणिकीनां सर्वासामंगप्रधानयागसाधनदेवतानां प्राप्तौ विकल्पप रिहाराय सर्वासामनुग्रहाय च लाघवाच्च विश्वेषां देवतात्वमिति चेन्न। मुख्यत्वात्प्रधा नदेवतानामेवान्वय उचित इत्याशंक्य तत्राप्युपांशुयाजस्य पुरोडाशसंबंधाभावान्न तत्त्वसंबंधस्तथा चाग्नेयाग्नीषोमयोरेव विकल्पेन समुच्चयेन वा देवतात्वं युक्तमित्या ह। तत्रापीति। अत्र यागे साधनत्वेनैकादेवतापेक्ष्यते तत्रोभयोरन्वये दोषविकल्पप्र संगात्तथा च लाघवान्मुख्यत्वाच्चाग्नेरेव देवतात्वमिति स्वाभिमतं मतमाह। केचिदिति

इति

वामादे

राम·

५३

ति। एवं प्रकृतावग्निदेवताकत्वेसिद्धे विकारे चिंता प्रस्तूयते। विकार इति। तत्रापि प्रकृतिन्यायेन पू र्वपक्षमाह। तत्रापीति। सिद्धांतमाह। प्राप्तेइति। तद्धान्नेति लक्षणयार्थोपपत्त्या वेत्यर्थः। पत्नी सूत्र क्षिति सूत्र द। ध्रौ सूत्र इति। समिष्टयजुरितीति। प्राप्ते द्रव्यगुणादावप्रसिद्धेरित्याशयः। ननूपयु क्तान्यसाधनकत्वात्प्रतिपत्तिकर्मेदमित्यत आह। अर्थकर्मचैतदिति। तद्यत्तासु स र्वासु समिष्टास्तथैवाभिर्जुहोतीति निश्रुतावुपाधिविशेषमनुक्त्वैव विधानादस्यार्थकर्म त्वमित्यर्थः। ननु नवा तस्य देवतात्वं युक्तं तस्याधिकरणत्वेन निर्देशात्तन्न चाधिकरणं स्वामित्वाव्यभिचारि माभूदुष्ट्रस्य कुंकुमाधारत्वेन तत्स्वामित्वं किं तर्हि संबुध्यंतानां देवानामेव देवतात्वमुचितमित्याशंक्य तेनान्वेति। हविर्भागित्वेन यागे देवतात्वस्यास्थि ते देवानां तदभावान्न देवतात्वमिति दूषयति नेतीति। मनसस्तु तेर्देवतात्वमाशंक्य नि

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राकरोति। मनसस्पतेरिति। दूषयति। नैतदेवमिति। यज्ञसंबंधो द्रव्यसंबंधः। देवतां तरस्यासंभवाद्यातस्यैवदेवतात्वमित्युपसंहरति। एवं चेति। एतदेवोपपादयति। यजुःशब्देनेत्यादिना।
बर्हिः॰रिति। वेद्यां॰स्त्वेति। पु॰मिति। नन्विदमनुपपन्नं वर्त्तमानपुरोडाशाश्रयेण कपालेन तु षत्वि
रसनस्य कर्त्तुमशक्यत्वादित्यत आह। पुरोडाशकपालयोरिति। एतदेवोपपादयति। नहीति
। कपालमात्रमिति। नन्वेवमासादनप्रोक्षणादिधर्माणां तत्र प्रवृत्तिः स्यादिति वाच्यं। तेषां पुरो
डाशरूपकार्यप्रयुक्तत्वेन तदभावे वैर्थ्यलोपेन तेषामपि बाधात्। न च तं तु षोपवापप्रयुक्तास्ते स्युं
तीति वाच्यं। कपालस्य पुरोडाशार्थत्वेनोपपत्तेः। अत्रैकदेशिमतं दूषयितुमुद्भावयति। तच्चे
तदिति। नन्वत्र तद्धितचतुर्थ्योरभावान्न देवतासंबंधोस्तीत्यत आह। देवतासंबंधश्चेति
। दूषयति। नैतदेवमिति। ननु मंत्रे रक्षसामिति षष्ठी श्रूयते सा च संबंधसामान्येनुशिष्टा

राम॰
५७

कृ

सामान्यं च विशेषमादाय पर्यवस्यति विशेषश्च स्व स्वामिभाव एव प्रतेद्रव्यस्वामि
त्वं च द्रव्यदेवतात्वमेवेति युक्तं मंत्रलिंगाद्रक्षसां देवतात्वमित्यत आह मंत्रवर्णादपी
ति। यत्रेति देवतोद्देशेन सक्तस्य द्रव्यप्रक्षेपलक्षणः संस्कारो विधीयते न च देवतोद्दे
शमंतरेण तदुपपद्यत इत्यर्थापत्यादेवं क्षेपे साक्षान्मंत्रवर्णेन तत्समर्प्यते न चेह होम

४ ता

श्रवणमस्ति। अस्यतिश्रवणादित्याह न चेहेति। द्रव्यपरत्वादिति रुद्रेभ्यः स्त्वेति मंत्र
वदिति भावः। पू॰ सेति। नन्विदं पूर्णपात्रग्रहणं प्रदीप्ते वितानेप्रवृत्ते कर्मण्युत्पन्नस्य
परितापस्य शांतये विधीयते तथा चांतापच्छिन्नेपि प्रवर्ततइत्यत आह पदार्थश्चेति।
परितापशांत्यर्थमस्य विधाने पुरुषार्थत्वात्क्रतूपकारकत्वं न स्यादित्याशयः। अत्र ग्र
हणनिनयनयोः शेषशेषिभावे विशेषानवगमात्संशयपूर्वकं विचारमारभते। तत्रैत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिति। ननु पक्षद्वयेपि प्रयोजनाभावान्नायं विचारः कर्तव्य इत्याक्षिपति किंचात इति। पक्षद्व
येपि प्रयोजनमाह यदीति। पूर्वपक्षमाह पूर्णपात्रमिति। तन्नीयमानं गृह्णातीति वाक्येन ग्रह
णस्य निनयनार्थता प्रतीयत इत्याह ग्रहणस्यत्विति। सिद्धांतमाह ग्रहणार्थतात्विति। ननु चो
दितत्वाविशेषाद्ग्रहणमेव निनयनार्थं किं न स्यादित्यत आह दृष्टोपकारेति। एतदेव विवृणो
ति। संजनयतीति। तथा च दृष्टोपकारजननलक्षणसामर्थ्येन वाक्यं बाध्यत इत्याशयः॥
विचारप्रयोजनमाह। द्वादशाह इति यजमानसंस्कारकत्वात्सर्वैर्ग्राह्य इत्यर्थः। सूत्रे। ननु
समारब्धयाध्वर्युर्मा भूदिति। अधिकारादित्युक्तं एतच्चादृष्टार्थे दृष्टानुपलब्धेः। न च श्र
मापनोद एव प्रयोजनं कर्मणः समाप्तत्वेन तदपनोदे प्रयोजनाभावात्। न च विष्णुक्रमार्थंत
त्। तेन विनापि विष्णुक्रमस्यानुष्ठातुं शक्यत्वात्। तस्माददृष्टद्वारा कर्मणो पूर्वस्यात्मसात्क

राम॰
५५

रणमेवास्य प्रयोजनं। ननु प्रोषिते न यजमानेन प्रदेशांतर उत्पन्नं कर्मापूर्वं कथमात्मसा
त्कर्तुं शक्यत इति चेन्न। आत्मनो व्यापकत्वेन तत्रापि सन्निधानादिति दिक्। विष्णुः। ध्रुवां सू
त्रे विष्णुक्रमान्नित्याहवनीयोपस्थानां तस्य कर्मणो नामधेयं विष्णुक्रमात्कुर्यादूर्ध्वं यज्ञविधे
रित्यादौ सव्यवहारार्थोऽयमपीति तत्तत्र श्वांतापाच्छिन्नादौ निवृत्तिः। अभ्या॰ ते। नन्वस्मादन्ना
दिति। मंत्रवाक्यं साकांक्षमित्यध्याहारेण पूरणीयमित्याशंक्यानुषंगसंभवेनाध्याहारस्या
न्याय्यत्वमिति मनसि निधायानुषंगमाह। साकांक्षत्वादिति। भागसंस्कारादिति। भागमि
ति द्वितीयाश्रुत्येक्षणस्य भागार्थत्वेन विनियोगात्तत्संस्कार इत्यर्थः। ईक्षणस्य भागार्थत्वेन
यजमानसंस्काराभावाद्यद्यनेके न चित्कृते शास्त्रार्थस्य कृतत्वादेक एवानेकयजमानकेकर्म
रोतीत्याहे तस्मादेवेति। अस्ये॰ मिं। आप्राङ् दृष्टानुपलब्धेरिदमप्यदृष्टार्थमित्याह। संज्ञो॰ यं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति।सं॰ज्योन्यं।ननु द्वितीयास्त्रुत्याहवनीयसंस्कारविधानमिदमित्याह तेने॰तिं॰स्वयं॰यीवर्च्चो॰
ते।सू॰॰क्षिणं।ननु सर्वत्राहुतीनां परिभाषैव प्रादक्षिण्यस्य विधानादत्र तद्ग्रहणमनुपपन्न
मिति चेदत्र केचित्। यत्र वस्त्वंतरप्रक्रम्याहुतिर्विधीयते तत्र प्रादक्षिण्यपरिभाषायामु
क्तं।न चात्र वस्त्वंतरप्रक्रमः।शरीरमात्रस्यापवर्त्तनविधानात् अतो विषयभेदान्नेदं तेन
गतार्थमित्याहुः। तन्न तत्राविशेषप्रतीतेर्विशेषपरत्वे प्रमाणानुपलब्धेः।एवं चेत्कः स
माधिरिति चेत् ह।प्रदक्षिणेति विषयव्याप्त्याख्यांतरमाह अथवेति।ननु प्रकृते ग्रहग्रहा
द्यभावादिदं सूत्रमनुपपन्नमित्याशंक्य सूत्रोत्थानिकामाह।प्रदक्षिणेति।गृह॰ष्णी॰।क्रिया
सामान्यान्मंत्रप्राप्तिर्माभूदिति सूत्रे तूष्णीमिति।गार्ह॰।इति।शं॰ब्दो॰सू॰णं।गं॰विति।अत्रो
रुव्यविलंबेन ततोसीत्यस्य कथंचिदुत्थाप्याकांक्षयैकवाक्यताभिमता इदं मेकर्मेदमि

त॰आ

राम॰
५६

तिसूत्रकरणात्।अन्यथा ततोसीति सूत्रं कुर्यात्।नवीनैस्त्वेकवाक्यता लिख्यते
ततोसीत्युत्तरमंत्रे व्याख्यातमिति ध्येयं इदंदिति।आत्मने।अग्रिमसूत्रस्योत्थानिका
माह।तत्स्थान इति पुत्राभाव आत्मनो नामग्रहणस्थाने दं पठनीयमित्यर्थः।आह॰स्सी॰
॥ननु मंत्रकरणकव्यापाराभावान्नेदमुपस्थानमिति चेत्तस्य उपस्थानशब्देनेक्षण
मात्रविधानात् ननु मंत्रप्राप्त्यभावात्तूष्णीग्रहणमनुपपन्नमित्याशंक्याह मंत्राभावा
दिति।एतावद्विष्णुक्रमणं विकृतौ बाधप्रतिप्रसवादिविषयमिति बोध्यं॰व्रतं॰यात्।येने
ति नन्वेवं येन मंत्रेण व्रतग्रहणं कृतं तेनैव विसर्ग इति सूत्रार्थः स्यादिति चेन्न स्यादेवं य
दि विसर्जतिना विधानं न स्यात् विसर्जनक्रिया हि स्वाभिधानसमर्थस्वक्रमपठि
तं मंत्रांतरं प्राप्य निराकांक्षीभूतानदूरस्थं ग्रहणमंत्रमाकांक्षते तस्माद्येनेत्येवं व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

स्व्येयं॥ अग्निलिंगकेन तद्लिंगकैवेत्यर्थः। तत्रैवात्राप्यग्निलिंगकालिंगकयोःसत्वात्।
संप्रैष्याति। मंत्रस्यसाकांक्षत्वेन क्रियमाणक्रियया तदाकांक्षापूरणाभावाद्ध्याहारमा
ह। साकांक्षत्वादिति। ब्राह्मणेन। याजमानावांतरसमारब्धयादानसामर्थ्यात्त्वयजमानं प्र
ति। ननु प्रैषमात्रमेवेदमदृष्टायविधीयतइत्यतआह। श्रुत्युपादानेति। नन्वेवमपिए
तच्छब्देनाव्यवहितपूर्वोपात्तप्रैषवचनमेवपरामृश्यते न ब्राह्मणभोजनरूपोर्थः तस्यपू
र्वमविहितत्वादिति चेन्न उपक्रमादिभ्योवाक्यस्यार्थएवनालेवेत्यर्थावधारणात्। तथाहि
कांतेतृप्तिरित्यनेनार्थस्यैवोपक्रांतत्वात्। ब्राह्मणस्यैवतृप्तिमनुतृप्येयमित्यनेनतस्यैवप
रामर्शात्। तस्मादित्यस्यप्रैषस्यलिंगेनार्थस्यैवस्मारकत्वाद्युक्तमेवैतदित्यनेनतस्यैवो
पसंहाराद्वाक्यस्यब्राह्मणभोजनविधौतात्पर्यमवधार्यतइति सर्वं सुंदरं॥ श्रीमदाचार्यव

र्याणां वरेण्येन विनिर्मितं॥ सूत्रेकर्कर्ण यद्भाष्यमभाणि न्यायसंयुतं॥ १॥ तत्रात्मारामसंकृ
त्याटीका भावविशोधिनी॥ तृतीये विदुषामस्यास्संत्यक्तापक्षपाततां॥ २॥ पुनर्दूष्याथवा
भूष्यायथेच्छन्यायवर्त्मनि॥ गच्छतोन्यायमार्गेण स्खलनंनैवदोषदं॥ ३॥ दोषउद्भाव्यतां
वात्रखेदोमेनास्तितत्रतु॥ कैर्वानोद्भाव्यते दोषो रागद्वेषविशारदैः॥ ४॥ इति श्रीभट्टज
यकृष्णात्मजभट्टआत्मारामविरचितायां श्रौतकात्तीयसूत्रकर्कभाष्यटीकायां भाव
विशोधिन्यां तृतीयोध्यायः॥ ॥संख्या ११४०॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.07.19 11:48
,TRANSFERRED=2019/07/22 at 12:04:01
,PAGES=59
,TYPE=STD
,NAME=S0001061
,Book Name=M-1965-SHROTKATIYSUTRA KARKBHASYSAHITAM PART 3
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection